'अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारः ते नशयन्तु शिवाज्ञया ।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामवरोधेन पूजाकर्म समारभे ।।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।।
वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः । अपसर्पंतु ते सर्वे यावत्पूजां करोम्यहम् ।।
विशन्तु भूतले नागाः लोकपालाश्च सर्वतः । अस्मद् गृहेऽवतिष्टन्ताम् आयुर्बलकरासदा ।।
पाखण्डकारिणो भूताः भूमौ ये चान्तरिक्षगाः। दिवि लोके स्थिताः ये च ते नश्यन्तु शिवाज्ञया ।।
निर्गच्छतां च भूतानां वर्त्म दद्यात् स्ववामतः । भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसः ।
स्थानादस्माद् व्रजन्त्वन्यत्स्वीकरोमि भुवंत्विमाम्, भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु पूजाकर्म समारभे ।।' एतैर्मन्त्रैः सर्वदिक्षु पीत सर्षपान् विकिरेत् ।
'ॐ प्राच्यै नमः, ॐ अवाच्यै नमः, ॐ प्रतीच्यै नमः, ॐ उदीच्यै नमः, ॐ अन्तरिक्षायनमः,
ॐ देवभूम्यै नमो नमः।' वामपादेन भूमि त्रिवारं ताडयेत् ।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

4.15 कुछ स्तोत्र पाठ - ।। अथ सप्तश्लोकी दुर्गा ।।

ईश्वर उवाच- देवि त्वं भक्तसुलभे सर्वकार्यविधायिनि, कलौ हि कार्यसिद्धयर्थमुपायं ब्रूहि यत्नतः ।

देव्युवाच- शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् , मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ।।

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः,
श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, श्रीदुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति ।। 1 ।।

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः, स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या, सर्वोपकारकरणाय सदार्द्रचित्ता ।। 2 ।।

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके, शरण्ये त्र्यम्बके गौरि नारायणी नमोऽस्तु ते ।। 3 ।।

शरणागतदीनार्तपरित्राणपरायणे, सर्वस्यार्तिहरे देवि नारायणी नमोऽस्तु ते ।। 4 ।।

सर्वस्वरुपे सर्वेशे सर्वशक्तिसमन्विते, भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ।। 5 ।।

रोगानशेषानपहंसि तुष्टा, रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां, त्वामाश्रिता ह्याश्रयतां प्रयान्ति ।।6।।

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ।। 7 ।।

।। इति श्रीसप्तश्लोकी दुर्गा सम्पूर्णा ।।

4.16 पंचपात्रस्थापनक्रमः - (मन्त्रमहोदधौ गन्धर्वतन्त्रे च)

'अर्घ्यपाद्याचमनीयमधुपर्काचमस्य च। पंचपात्रणि पुष्पादीन्स्थापयेत्स्वीयदक्षिणे।।
वामेऽम्बुपात्रं छत्रमादर्शचामरे। करयोः क्षालनार्थाय पृष्ठे पात्रम्विनिर्दिशेत्।।'

अर्थात् पाद्य, अर्घ्य, आचमनीय, मधुपर्क और मार्जन - इन पांच पात्रों में से प्रथम चार पात्रों (यानि मार्जन पात्र को छोड़कर) और पुष्पादियों को अपने दाहिने भाग में स्थापित करें। बायें भाग में जल से भरा एक घड़ा, छत्र, दर्पण, चामर आदि को रखें। मार्जन पात्र को हस्त प्रक्षालन केलिये अपने पीछे रखें।

अथ पूजापद्धति आरम्भः

5. अथ पूर्वांगकर्म

5.1 दिशानिर्णयः - इसी ग्रन्थ के पृष्ठ संख्या 10 देखें।

5.2 आसननिर्णयः - इसी ग्रन्थ के पृष्ठ संख्या 11 देखें।

5.3 पत्नी वामदक्षिणनिर्णयः-इसी ग्रन्थ के पृष्ठ संख्या 49 देखें।

5.4 आचमन - इसी ग्रन्थ के पृष्ठ संख्या 51 देखें।

5.4-1 कुल्लुकामन्त्र - (विशुद्धेश्वरतन्त्रे)

'कालीकूर्चम्वधूर्मायाफडन्ता परमेश्वरि। पंचाक्षरी चण्डिकाया कुल्लुका परिकीर्तिता।।'

अर्थात् **'क्लीं ऐं श्रीं ह्रीं फट्'** - यह चण्डिका यानि देवी का पंचाक्षरी कुल्लुका मन्त्र है।

'अज्ञात्वा कुल्लुकां देवि महामन्त्रं जपेत्तु यः। तस्य नश्यन्ति चत्वारि आयुर्विद्यायशोबलम्।।' (- कुलार्णवतन्त्रे)

अर्थात् हे देवी! कुल्लुका मन्त्र को जाने विना नवार्णव रूपी महामन्त्र जप व सप्तशती का पाठ करने से यजमान के आयु, विद्या, यश और बल नष्ट होता है। अतः कुल्लुका मन्त्र को कम से कम 11 बार जप कर ही आचमन आदि कर्म आरम्भ करें।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

5.5 शरीर शुद्धिः – अपने ऊपर प्रोक्षण करें।

'ॐ अपवित्रःपवित्रो वेति मन्त्रस्य वामदेव ऋषिर्गायत्रीछन्दो विश्णुर्देवता शरीरादिपवित्रकरणे विनियोगः।
ॐ अपवित्रःपवित्रो वा सर्वावस्थांगतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः।
ॐ पुण्डरीकाक्षःपुनातु । ॐ पुण्डरीकाक्षःपुनातु । ॐ पुण्डरीकाक्षःपुनातु ।'

5.6 पवित्र धारण करें –

'यथा वज्रं सुरेन्द्रस्य यथा चक्रं हरेस्तथा । त्रिशूलं च त्रिनेत्रस्य तथा विप्र पवित्रकम् ।।
ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्यरश्मिभिः ।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ।' तत्पश्चात् तीन बार प्राणायाम करें।

5.7 शिखाबन्धनम् –

'ऊर्ध्वकेशि विरुपाक्षि मांसशोणितभोजने। तिष्ठ देवि शिखबन्धे चामुण्डे चापराजिते।।
विष्णो नाम सहस्त्रैस्तु शिखाबन्धं करोम्यहम् '

5.8 प्राणायामः –

दाहिने हाथ में गन्धाक्षतपुष्प ग्रहण कर– **'ॐ प्रणवस्य परब्रह्म ऋषिः, परमात्मा देवता, दैवीगायत्री छन्दः, प्राणायामे विनियोगः।'**
जल छोड़े और समनु (यानि मानस मन्त्रोच्चारणपूर्वक) नाडी – शोधन प्राणायाम करे – **'ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं ब्रह्म**

भूर्भुवःस्वरोम्'। अधिक जानकारी केलिये इसी ग्रन्थ के पृष्ठ संख्या 56 देखें।

5.9 पुनराचमनम् – इसी ग्रन्थ के पृष्ठ संख्या 51 देखें।

5.10 दिग्रक्षणम् -

'अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारः ते नशयन्तु शिवाज्ञया ।।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामवरोधेन पूजाकर्म समारभे ।।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।।
वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः । अपसर्पंतु ते सर्वे यावत्पूजां करोम्यहम् ।।
विशन्तु भूतले नागाः लोकपालाश्च सर्वतः । अस्मद् गृहेऽवतिष्टन्ताम् आयुर्बलकरासदा ।।
पाखण्डकारिणो भूताः भूमौ ये चान्तरिक्षगाः। दिवि लोके स्थिताः ये च ते नश्यन्तु शिवाज्ञया ।।
निर्गच्छतां च भूतानां वर्त्म दद्यात् स्ववामतः । भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसः ।
स्थानादस्माद् व्रजन्त्वन्यत्स्वीकरोमि भुवंत्विमाम्, भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन।
ते सर्वेऽप्यपगच्छन्तु पूजाकर्म समारभे ।।' एतैर्मन्त्रैः सर्वदिक्षु पीत सर्षपान् विकिरेत् ।
'ॐ प्राच्यै नमः, ॐ अवाच्यै नमः, ॐ प्रतीच्यै नमः, ॐ उदीच्यै नमः, ॐ अन्तरिक्षायनमः,
ॐ देवभूम्यै नमो नमः।' वामपादेन भूमि त्रिवारं ताडयेत् ।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

5.11 पृथ्वी पूजन करें -

ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः, सुतलं छन्दः, कूर्मो देवता, आसने विनियोगः ।
ॐ पृथ्वी त्वया धृता लोकाः देवि त्वं च विष्णुनाधृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।।
ॐ पृथिव्यै नमः। ॐ आधार शक्त्यै नमः। ॐ कूर्मासनायै नमः। ॐ कमलासनायै नमः। ॐ विमलासनायै नमः।
ॐ महाशक्त्यै नमः । ॐ मायाशक्त्यै नमः। ॐ योगासनायै नमः। ॐ अनन्तासनायै नमः। मध्ये-**ॐ परमसुखासनायै नमः। ॐ भूर्भुवः स्वः आत्मासनायै नमः।** पृथ्वी का गन्धाक्षत आदि से पंचोपचार पूजन करें ।

5.12 दीपार्चनम् - (अखण्डदीपस्थापने च)

गन्धपुष्पाक्षत आदि से दीपक केलिये आसन तैयार कर उस पर दीपक को स्थापित कर दीपक को प्रज्वलित करे -

'ॐ नमो भगवति ज्वालामालिनी देवी सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल हुं रं रं हुं फट् स्वाहा।'

गन्धपुष्पाक्षत आदि से पूजा करे- **'ॐ श्रीज्वालामालिनी कर्मसाक्षिणी प्रत्यक्षदीपराजाय नमः।।'** प्रार्थना पूर्वक पुष्पार्पण करे

'भो दीपदेवि रूपस्त्वं कर्मसाक्षिण्यविघ्नकृत्। यावत्कर्मसमाप्तिः स्यात्तावत्त्वं सुस्थिरो भव।।
दीपदेवि महादेवि शुभं भवतु मे सदा। यावत्पूजासमाप्तिः स्यात्तावत्प्रज्वल सुस्थिरा।।'

5.13 शंखपूजनम् -

गन्धपुष्पाक्षतादि से शंखगायत्री मन्त्र से शंख का पूजन करे-

'पांचजन्याय विद्महे पवमानाय धीमहि। तन्नः शंखः प्रचोदयात् '

तीनबार शंख को बजावे और धोकर शंख में दो दर्भ/दूर्वा, तुलसी और फूल ड़ालकर **'ॐ'** उच्चारण करते हुये सुवासित जल से भरके

गायत्री मन्त्र से अभिमन्त्रित करे। उसके पीठ पर उसे रखे। निम्न मन्त्र से तीर्थो का आवाहन करे -

'पृथिव्यां यानि तीर्थानि स्थावराणि चराणि च। तानि तीर्थानि शंखेऽस्मिन् विशन्तु ब्रह्मशासनात्।।'

निम्न मन्त्र से पंचोपचार पूजन करे -

'ॐ भूर्भुवःस्वः शंखस्थदेवताभ्यो शंखाभिमानिदेवताभ्यश्च नमः सर्वोपचारार्थे गन्धादीन्समर्पयामि।'

5.14 घण्टार्चनम् -

गन्धपुष्पाक्षतधूपादि से घण्टा की पूजा करे -

'ॐ हे घण्टे सुस्वरे पीठे घण्टाध्वनिविभूषिते। वादयन्ति परानन्दे घण्टादेवं प्रपूजयेत्।।'

निम्न मन्त्र से पंचोपचार पूजन करे -

'ॐ भूर्भुवःस्वः घण्टस्थदेवताभ्यो घंटाभिमानिदेवताभ्यश्च नमः सर्वोपचारार्थे गन्धादीन्समर्पयामि।'

और निम्न मन्त्रोच्चारण पूर्वक घण्टा बजाये-

'आगमार्थं च देवानां गमनार्थं च रक्षसाम्। कुर्यात् घण्टारवं तत्र देवताऽऽह्वानलांछनम्।।'

5.15 यजमानतिलकम् -

यजमानहस्ते आचार्यो रक्षाबन्धनं तथा शिरसि कुंकुमेन तिलकं कुर्यात् ।

'ॐ यदाबध्नन् दाक्षायणा हिरण्यꣳशतानीकाय सुमनस्यमानाः ।

तन्मे आबध्नामि शतशारदायाऽऽयुष्मान् जरदष्टिर्यथासम् ।' इति रक्षाबन्धनम् ।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ स्वस्तिनः इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ।
स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ।।' ।। इति तिलकम् ।।

5.16 शान्ति पाठः –

ॐ आनो भद्राः क्रतवो यन्तु विश्वतो दब्धासोऽपरीता सऽउद्भिदः। देवानो यथासदमिद्वृधेऽसन्नप्रायुवो रक्षितारो दिवे दिवे।।1।।
देवानां भद्रा सुमतिर्ऋजूयतान्देवानाꣳ रातिरभिनो निवर्तताम्। देवानाꣳसख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे।।2।।
तान्पूर्वयानिविदाहूमहे वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम्। अर्यमणम्वरुणꣳसोममश्विना सरस्वती नः सुभगामयस्करत्।।3।।
तन्नो वातोमयोभुवातु भेषजन्तन्माता पृथिवी तत्पिता द्यौः। तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतन्धिष्ण्या युवम् ।।4।।
तमीशानञ्जगतस्तस्तुषस्पतिन्धियञ्जिन्वमसे हूमहे वयम्। पूषानो यथा वेदसामसद्वृधेरक्षिता पायुरदब्धः स्वस्तये।।5।।
स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।6।।
पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो विदथेषु जग्मयः। अग्निजिह्वा मनवः सूरचक्षसो विश्वेनो देवाऽवसागमन्निह।।7।।
भद्रं कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभि र्व्यशेम देवहितं यदायुः।।8।।
शतमिन्नुशरदोऽन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो मध्यारीरिशतायुर्गन्तोः।।9।
अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवाऽदितिः पंचजनाऽदितिर्जातमदितिर्जनित्वम्।।10।।
तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः। नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽधिरोचने दिवः।।11।।
आयुष्यं वर्चस्यꣳराय स्पोषमौद्भिदम्। इदꣳहिरण्यं वर्चस्व जैत्रायाविशतादुमाम्।।12।।
द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोशधयः शान्तिः। वनस्पतयः

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।।13।।
यतो यतः समीहसे ततो नोऽभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः।।14।। सुशान्तिर्भवतु।।

ॐ श्रीमहागणाधिपतये नमः।। ॐ लक्ष्मीनारायणाभ्यां नमः।। ॐ उमामहेश्वराभ्यां नमः।। ॐ वाणीहिरण्यगर्भाभ्यां नमः।। ॐ शचीपुरन्धराभ्यां नमः।। ॐ मातापितृचरणकमलेभ्यो नमः।। ॐ कुलदेवताभ्यो नमः।। ॐ इष्टदेवताभ्यो नमः।। ॐ ग्रामदेवताभ्यो नमः।। ॐ स्थानदेवताभ्यो नमः।। ॐ वास्तुदेवताभ्यो नमः।। ॐ सर्वोभ्यो देवताभ्यो नमः।। ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः।। ॐ पुण्यं पुण्याहं दीर्घमायुरस्तु।।

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।1।।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणयादपि।।2।।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते।।3।।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजं । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।4।।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः।।5।।
सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरी नारायणि नमोऽस्तु ते।।6।।
सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं। येषां हृदिस्थो भगवान्मंगलायतनो हरिः।।7।।
लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः। येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः।।8।।
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरम्। सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये।।9।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः। देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः।।10।।
वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।11।।
तीक्ष्णद्रष्ट्रमहाकाय कल्पान्तदहनोपम। भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि।।12।।'
पुष्पाक्षत को गणेशजी के चरणों में अर्पण करें।

5.17 कर्मपात्रपूजनं –

कर्मपात्र की आधारभूत भूमि को '**हुं**' मन्त्र से प्रक्षालित कर भूमि पर बिन्दुत्रिकोणषट्कोणवृत्तचतुरस्र यन्त्र बनाकर गन्धाक्षतपुष्प से पूजन करे – '**ॐ ऐं ह्रीं क्लीं**' – मध्ये; '**ॐ ऐं, ॐ ह्रीं, ॐ क्लीं**' – त्रिकोणस्य त्रिभुजेषु; '**ॐ ऐं ह्रीं क्ली, चामुण्डायै, विच्चै, ॐ ऐं ह्रीं क्लीं, चामुण्डायै, विच्चै**' – षट्कोणस्य षट्भुजेषु; '**ॐ अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं वं रं लं शं षं सं हं ळं क्षं**' – वृत्ते, अब चतुरस्र में – '**ॐ ऐं हृदयाय नमः** – आग्नेये, **ॐ ह्रीं शिरसे स्वाहा** – ऐशान्ये, **ॐ क्लीं शिखयै वषट्** – नैर्ऋत्ये, **ॐ चामुण्डायै कवचाय हुम्** – वायव्ये, **ॐ विच्चे नेत्रत्रयाय वौषट्** – मध्ये, **ॐ ऐं ह्रीं क्लीं** – चतुर्दिक्षु। इस प्रकार यन्त्र की पूजा कर उसे स्पर्श किये हुये इस मन्त्र का पाठ करें– '**ॐ भूरसि भूमिरस्यदितिरसि विश्वधा या विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिꣳसीः।।**

ॐ रं वह्निमण्डलाय दशकलात्मने श्रीत्रिगुणात्मिका दुर्गादेवता कर्मपात्राधाराय नमः।'

वहीं पर दस कलाओं का पूजन करें –

'ॐ यं धूमार्चिषे नमः, ॐ रं ऊष्मायै नमः, ॐ लं ज्वलिन्यै नमः, ॐ वं ज्वालिन्यै नमः, ॐ शं विस्फुलिंगिन्यै नमः, ॐ षं सुश्रियै नमः, ॐ सं सुरूपायै नमः, ॐ हं कपिलायै नमः, ॐ ळं हव्यवाहायै नमः, ॐ क्षं कव्यवाहायै नमः।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

अगले मन्त्र का पाठ करते हुये थोड़े धान्य को उस पर ड़ालें-

ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषेधान् देवो वः सविता हिरण्यपाणिः। प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनाम्पयोसि।।' अब 'हुं' इस मन्त्र से कर्मपात्र का प्रक्षालन कर उस पर स्थापित करें-

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विद वः पुनरूर्ज्जानिवर्तस्वसानः। सहस्रं धुक्ष्वोरु धारापयस्वतीः पुनर्मा विशताद्रयिः।।'

उस पात्र की पूजा करें - **'ॐ सं सूर्यमण्डलाय द्वादशकलात्मने श्रीत्रिगुणात्मिका दुर्गादेवता कर्मपात्राय नमः।'**

उस पात्र पर ही द्वादश कलाओं का पूजन करे - **'ॐ कं भं तपिन्यै नमः, ॐ खं बं तापिन्यै नमः, ॐ गं फं धूम्रायै नमः, घं पं मरिच्यै नमः, ॐ ङं नं ज्वालिन्यै नमः, ॐ चं धं रुच्यै नमः, ॐ छं दं सुषुम्नायै नमः, ॐ जं थं भोगदायै नमः, ॐ झं तं विश्वायै नमः, ॐ ञं णं बोधिन्यै नमः, ॐ टं ढं धारिण्यै नमः, ॐ ठं डं क्षमायै नमः।'** अब कर्मपात्र को जल से भरें-

'ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भ सर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत सदनमासीद।। ॐ ळं क्षं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं औं आं ऐं एं लृं लृं ॠं ऋं ऊं उं ईं इं आं अं नमः।।' गालिनी मुद्रा से निरीक्षण कर जल की पूजा करें -

'मं सोममण्डलाय षोडशकलात्मने श्रीत्रिगुणात्मिका दुर्गादेवता कर्मपात्रस्थजलाय नमः।'

उसी में सोलह कलाओं का पूजन करें - **'ॐ अं अमृतायै नमः, ॐ आं मानदायै नमः, ॐ इं पूषायै नमः, ॐ ईं पुष्ट्यै नमः, ॐ उं तुष्ट्यै नमः, ॐ ऊं रत्यै नमः, ॐ ऋं धृत्यै नमः, ॐ ॠं शशिन्यै नमः, ॐ लृं चन्द्रिकायै नमः, ॐ लृं कान्त्यै नमः, ॐ एं ज्योत्स्नायै नमः, ॐ ऐं श्रियै नमः, ॐ ओं प्रीत्यै नमः, ॐ औं अंगदायै नमः, ॐ अं पूर्णायै नमः, ॐ अः पूर्णामृतायै नमः।'**

'फड्' मन्त्र से रक्षित कर **'ॐ ऐं ह्रीं क्लीं'** मन्त्र से देवी का आवाहन कर आवाहनादि मुद्रा दर्शाते हुये बोले - **'आवाहिता भव,**

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

स्थापिता भव, सन्निहिता भव, सन्निरुद्धा भव, सम्मुखीकृता भव, षडंगेन सकलीकृता भव, अवगुण्ठिता भव, अमृतीकृता भव, परमीकृता भव, मत्स्यमुद्रा से आच्छादन करे, '**ॐऐं ह्रीं क्लीं**' मन्त्र का आठ बार जप कर धेनुमुद्रा व योनिमुद्रा दर्शाये। तत्पश्चात् उसमें गन्ध को समर्पित करें- '**ॐ त्वां गन्धर्वाऽअखनस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत।।**' उसमें अक्षत ड़ालें - '**अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत। अस्तोषतस्व भानवो विप्रानविष्ठयामती यो जान्विन्द्र ते हरी।।**'

उसमें पुष्प को ड़ालें- '**ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा। मनैनुवभ्रूणामहं शतं धामानि सप्त च।**'

तदनन्तर दूर्वा ड़ालें- '**ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुंशस्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च।।**'

कर्मपात्र के अन्दर डाली गयी सामग्री को पुष्प से अच्छी तरह से घुमायें और कर्मपात्र के गले में मौली को बांधें -

'**ॐ सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः। वासोऽअग्ने विश्वरूपं संव्ययस्व विभावसो।।**'

पुष्पाक्षतों से तीर्थो का आवाहन करें -

'**काशी कुशस्थली मायाऽवन्त्ययोध्या मधोपुरी। शालिग्राम सगोकर्ण नर्मदा च सरस्वती।।**
गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु।।
ब्रह्माण्डोदरतीर्थानि करे स्पृष्टानि ते रवे। तेन सत्येन देवेश तीर्थं देहि दिवाकर।।
पुष्कराद्यानि तीर्थानि गंगाद्यास्सरितस्तथा। आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः।।
नन्दिनी नलिनी सीता मालती च महापगा। विष्णुपादाब्जसम्भूता गंगा त्रिपथगामिनी।।
ॐ पंचनद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधा सो देशेऽभवज्सरित्।।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

इस प्रकार तीर्थो का आवाहन करके पवित्र से जल का आलोडन करें -

'ॐ यद्देवा देव हेडनं देवा सश्च कृमावयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः।।
ॐ यदि दिवा यदि नक्तमेनाꣳसि च कृमावयम्। वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः।।
ॐ यदि जाग्रद्यदि स्वप्न एनाꣳसि च कृमावयम्। सूर्योमा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः।।'

हाथ जोड़कर प्रार्थना करें -

'नमामि गंगे तव पादपंकजं सुरासुरैर्वन्दितदिव्यरूपम्। भुक्तिं च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम्।।
अहिरिपुपतिकान्ता तातसंबद्धकान्ता, हरतनयनिहन्ता प्राणदाता ध्वजस्य।
सखिसुतसुतकान्ता तातसंपूज्यकान्ता, पितुः शिरसि वहन्ती जाह्नवी नः पुनातु।।'

तत्पश्चात् कर्मपात्रस्थ पुष्प से सभी पर और समस्त सामग्री पर प्रोक्षण करें -

'ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः।।'
पुण्डरिकाक्षः पुनातु। पुण्डरिकाक्षः पुनातु। पुण्डरिकाक्षः पुनातु।।

5.18 सूर्यार्घ्यः -

चन्दन से भूमि पर त्रिकोण वृत्त, चतुरस्त्र मण्डल लिख कर गन्धाक्षत-पुष्पादि से मण्डल का पूजन करके अर्घ्य स्थापित करें । अर्घ्यपात्र में अधोलिखित मंत्र से जल भरें -

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ।
ॐ गंगे च यमुने चैव गोदावरि सरस्वती । नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

अकुश मुद्रा से तीर्थों का आवाहन कर गन्धाक्षतरक्तचन्दनरक्तपुष्पादि को अर्घ्यपात्र में डालकर ध्यान करे ।

'अरुणोऽरुण पंकजे निषण्णः कमलेऽभीतिवरौ करैर्दधानः।
स्वरुचार्हित मण्डलस्त्रिनेत्रो रबिराकल्प शताकुलोऽवतान्नः।।'

सूर्य को अर्घ्य दें - **'एहि सूर्य सहस्रांशो तेजोराशेः जगत्पते। अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर।।'**

5.19 सूर्यनमस्कारः -

'ध्येयः सदा सवितृमण्डलमध्यवर्ति, नारायणः सरसिजासनसन्निविष्टः।
केयूरवान्मकरकुण्डलवान् किरीटी, हारी हिरण्मयवपुः धृतशंखचक्रः।।
नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये नमस्ते कर्मदायिने।।
आदित्याय नमस्कारं ये कुर्वन्ति दिने दिने। जन्मान्तरसहस्रेषु दारिद्र्यं नोपजायते।।'

5.20 प्रधानसंकल्पः-

दाहिने हाथ में पुष्पाक्षतद्रव्यसहित जल को धारण कर देवी का ध्यान पूर्वक संकल्प करे -

ऊँ विष्णुर्विष्णुर्विष्णुः। ऊँ श्रीपुराणपुरुषोत्तमस्य श्रीविष्णोराज्ञया प्रवर्तमानस्य श्रीब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गतब्रह्मावर्तैकदेशे पुण्यप्रदेशे बौद्धावतारे .....खण्डे....क्षेत्रे .....मण्डले.....तटे देवब्राह्मणानां सन्निधौ श्रीमन्नृपति वीरविक्रमादित्यात्प्रवर्तमाने .....संवत्सरे ....अयने महामांगल्यप्रदे मासानामुत्तमे.....मासे.....पक्षे.....तिथौ.....वासरे .....नक्षत्रे....राशिस्थिते सूर्ये यथास्थितेषु चन्द्रभौमबुध

ागुरुशुक्रशनिषु सत्सु शुभयोगे शुभकरणे एवं ग्रहगणविशेषणविशिष्टायां शुभपुण्यतिथौ श्रीमहादुर्गाया अनुग्रहतो ग्रहकृतराजकृत सर्वबाधानिवृत्तिपूर्वकं ग्रहादीनां स्थितिवशादुत्पन्नदोषेण व्यवहारे चोत्पन्नानामुत्पद्यमानानां च विघ्नानां प्रशमनपूर्वकं, भौम्यान्तरिक्ष दिव्यमहोत्पातागामीसंचितसूचितदुष्टानिष्टदोष परिहारपूर्वकं विशेषेण स्वकीयैः परकीयैः स्वग्रामस्थैरन्यैर्वा कृतक्रियमाण कारयिष्यमाणदुष्टयंत्रमंत्रतंत्रविषशल्यौशधप्रतिमास्थापनादि सर्वाभिचारकर्मघातकर्मफणिहवनश्येनयजनदुर्निरीक्षण दैवतोपासनादिक्षुद्रकर्मजन्यदोषपरिहारपूर्वकं विशेषतो न्यायालये राजसभायां तद्द्वारे वा सर्वत्र ममाध्यात्मिकाधिभौतिकाधि दैविकस्वरूपरक्षणार्थमलक्ष्मीपरिहारार्थं महालक्ष्मीकृपाकटाक्ष प्राप्त्यर्थं भो मात ह्रीं दुं दुर्गे किं स्वपिषी उत्तिष्ठ पुरुषी सर्वतः ममुपस्थितानर्थनिवृत्तये स्वयं कुरु वा मां निमित्तीकृत्य वा यत्कर्तव्यं तत्कारय तदर्थं न्यासविधिसहितध्यानपूर्वकं सग्रहमखां स्वस्तिपुण्याहवाचनं मातृकापूजनं नवग्रहपूजनं नान्दीश्राद्धादिकार्यं श्रीदुर्गादेवताप्रीत्यर्थं यथासंभवद्रव्यैः यथाशक्तिसपर्याक्रमं यन्त्र/मूर्तिस्थापनादिपूर्वकं श्रीदुर्गापूजनं श्री.....अहं (यजमानस्य गोत्रादिकथनपूर्वकं प्रथमान्तेन नाम उक्त्वा) **श्री.....नामकार्चकेन** (अर्चकस्य च गोत्रादिकथनपूर्वकं) **कारयिष्ये** (अथवा **स्वयं करिष्ये**) **तेन परमेश्वरपरमेश्वरीं च प्रीणयामि।**

5.21-1 कुलवृक्षाः -

'अशोकः केशरो बिल्वः कर्णिकाच्युतस्तथा। नमेरुश्च प्रियालश्च सिन्दुवारकदम्बकौ।।
मरुवकश्चम्पकश्चैव विल्वश्च द्वादशस्मृतः। एतान्वृक्षान्तु स्मृत्वैव कुर्याद् गुर्वादि पूजनं।।'

नमेरु = रुद्राक्ष। अर्थात् अशोक, केशर, बिल्व, कर्णिका, आम, रुद्राक्ष, प्रियाल, सिन्दुवार, कदम्ब, मरुवक, चम्पक और विल्व - इन बारह वृक्षों को स्मरण करके ही गुरुगणेशादि के पूजन पूर्वक कलशस्थापना करें।

CC-0. Satya Sadguna Kuir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

5.21-2 श्रीगणेशाम्बिकयोः पूजनम् -

हाथ में पुष्पाक्षत लेकर आवाहन करे - **'ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधिपतिं हवामहे वसो मम। आहमजानि गर्भधमात्वमजासि गर्भधम् । ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरुपेभ्यो विश्वरुपेभ्यश्च वो नमो नमः।'**

हे हेरम्ब त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः।।1।।

नागास्यं नागहारं त्वं गणराजं चतुर्भुजं। भूषितं स्वायुधैर्दिव्यैः पाशांकुशपरश्वधैः।।2।।

आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः। इहागत्य गृहाण त्वं पूजां यागं च रक्ष मे।।3।।

गजाननं भूतगणाधिसेवितं, कपित्थजम्बूफलचारुभक्षणम्। उमासुतं शोकविनाशकारणं,

नमामि विघ्नेश्वरपादपंकजम्।।

आगच्छ भगवान्देव स्थाने चात्र स्थिरो भव। यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव।।5।।

लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय। विर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा।।6।।

विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।

नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते।।7।।'

निम्न मन्त्र से पंचोपचार पूजन करे -

'ॐ भूर्भुवःस्वःगं गणपतये नमः, गणपतिमावाहयामि, भो गणपते इह आगच्छ।'

ध्यान करें - **खर्वं स्थूलतनुं गजेन्द्रवदनं लम्बोदरं सुन्दरं, प्रस्यन्दन्मदगन्धलुब्धमधुपव्यालोलगण्डस्थलम्।**
दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरं, वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्।।

अथ अम्बिका पूजनम् -

हाथ में पुष्पाक्षत लेकर आवाहन पूर्वक प्रणाम करें -

'ॐ अम्बे अम्बिकेऽअम्वालिके न मानयति कश्चन । ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।।'

इति प्रणम्य पुष्पासनं दत्त्वा निम्न मन्त्र से पंचोपचार पूजन करे -

'ॐ भूर्भुवःस्वः अम्बिकायै नमः सर्वोपचारार्थे गन्धादीन्समर्पयामि।'

प्रार्थना करें -

'नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।।
हेमाद्रितनयांदेविं वरदां शंकरप्रियाम्। लम्बोदरस्य जननीं गौरीमावाहयाम्यहम्।।
त्वं वैष्णवी शक्तिरनन्तवीर्या, विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत्, त्वं वै प्रसन्ना भुवि मुक्तिहेतुः।।'

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञꣳसमिमं दधातु । विश्वेदेवा स इह मादयन्तामों3 प्रतिष्ठ ।।
ॐ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन ।।

गणेशाम्बिके सुप्रतिष्ठिते वरदे भवेताम्। विचित्ररत्नखचितं दिव्यास्तरणसंयुतम्। स्वर्णसिंहासनं चारु गृह्णीष्व सुरपूजित।।'

पुष्पासनं दत्त्वा निम्न मन्त्र से पंचोपचार/दशोपचार/षोडशोपचार पूजन करे - **'ॐ भूर्भुवःस्वः श्रीगणेशाम्बिकायै नमः'** तद्यथा -

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

प्रादयोः पाद्यं समर्पयामि, हस्तयोरर्घ्यं समर्पयामि, मुखे आचमनीयं समर्पयामि, सर्वांगे स्नानीयं जलं समर्पयामि, वस्त्रोपवस्त्रार्थे अलंकरणार्थे च साक्षतं कौसुम्बसूत्रं समर्पयामि, यज्ञोपवीतं समर्पयामि, गन्धम्विलेपयामि, अक्षतान्समर्पयामि, पुष्पाणि समर्पयामि, दूर्वाकुराणि समर्पयामि, धूपमाघ्रापयामि, प्रत्यक्षदीपं दर्शयामि, (हस्तौ प्रक्षाल्य) नैवेद्यं निवेदयामि, (जलेनाभ्युक्षणं) सत्यन्त्वर्तेन परिषिंचामि -प्रातः/ ऋतं त्वा सत्येन परिषिंचामि - सायं (गन्धपुष्पाभ्यामाच्छाद्य धेनुमुद्रयामृतीकृत्य ग्रासमुद्रां प्रदर्श्य) ॐ प्राणाय स्वाहा, ॐ अपानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ व्यानाय स्वाहा, ॐ समानाय स्वाहा। मध्ये-मध्ये आचमनीयं जलं समर्पयामि, उत्तरापोषणार्थे किंचिन्नैवेद्यं निवेदयामि, पुनराचमनीयं समर्पयामि, करोद्वर्तनार्थे गन्धं समर्पयामि, हस्तप्रक्षालनार्थे मुखप्रक्षालनार्थे च जलं समर्पयामि, मुखशुद्ध्यर्थे एलालवंगकर्पूरयुतं ताम्बूलपूगीफलं समर्पयामि, यथाशक्ति दक्षिणाद्रव्यं समर्पयामि।।

महागणपत्यम्बिकयोः प्रार्थना ।।

'ॐ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः । नमस्ते रुद्ररूपाय करिरूपाय ते नमः ।।1 ।।
विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे । भक्तप्रियाय देवाय नमस्तुभ्यं विनायकः ।।2 ।।
ॐ त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति वरप्रदेति ।
विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ।।3 ।।
भक्तार्तिनाशनापराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय।
विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते।।4।।
नमो देव्यै महादेव्यै शिवायै सततं नमः। नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्।।1।।

त्वं वैष्णवी शक्तिरनन्तवीर्या, विश्वस्य बीजं परमासि माया।
सम्मोहितं देवि समस्तमेतत्, त्वं वै प्रसन्ना भुवि मुक्तिहेतुः।।2।।

।। विशेषार्घ्यम् ।।

रक्ष रक्ष गणाध्यक्ष रक्ष स्त्रैलोक्यरक्षक । भक्तानामभयंकर्ता त्राता भव भवार्णवात् ।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो । वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।।
अनेन सफलार्घ्येण फलदोऽस्तु सदा मम । रक्ष त्वं मुण्डधारी च पर्वते निर्झरेऽपि वा ।
संग्रामे शत्रुमध्ये विश विश भविशे संकटे कुत्सिते वा ।।
व्याघ्रे चौरे च सर्पे वाप्युदधि भुवितले वहिनमध्ये च दुर्गे ।
रक्षेत्सा दिव्यमूर्तिः प्रदहतु दुरितं चण्डमुण्डा प्रचण्डा ।।
ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहिताय महागौरीसहितमहागणपतिदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः सवाहनाः प्रीयन्तां न मम ।

।। गणपत्यथर्वशीर्षम् ।।

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्वं साक्षादात्मासि नित्यम्। ऋतं वच्मि। सत्यं वच्मि । अव त्वं माम्। अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवानूचानमवशिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् । अव

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि पाहि समन्तात्। त्वं वाङ्मयस्त्वं चिन्मयः। त्वमानन्दमयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञानमयोऽसि। सर्वं जगदिदं त्वतो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्पदानि। त्वं गुणत्रयातीतः। त्वमवस्थात्रयातीतः। त्वं देहत्रयातीतः। त्वं कालत्रयातीतः। त्वं मूलाधारस्थितोऽसि नित्यम्।त्वं शक्तित्रयात्मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिद्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम्॥ गणादीन्पूर्वमुच्चार्य वर्णादींस्तदनन्तरम्। अनुस्वारः परतरः। अर्धेन्दुलसितम्। तारेण रुद्धम्। एतत्तव मनुस्वरुपम्। गकारः पूर्वरुपम्। अकारो मध्यमरुपम्। अनुस्वारश्चान्त्यरुपम्। बिन्दुरुत्तररुपम्। नादः सन्धानम्। संश्हिता सन्धिः। सैषा गणेशविद्या। गणक ऋषिः। निचद्गायत्री छन्दः। गणपतिर्देवता। ॐ गं गणपतये नमः। एकदन्ताय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्ती प्रचोदयात्॥ एकदन्तं चतुर्हस्तं पाशमङ्कुश धारिणम्। वरदं च हस्तैर्विभ्राणं मूषकध्वजम्॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्। भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्॥ एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः॥ एतदथर्वशीर्षं योऽधीते। स ब्रह्मभूयाय कल्पते। स सर्वविघ्नैर्न बाध्यते। स सर्वतः सुखमेधते। स पञ्चमहापापात्प्रमुच्यते॥ सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायम्प्रातः प्रयुञ्जानोऽपापो भवति। सर्वत्राधीयानोऽपविघ्नो भवति। धर्ममर्थं कामं मोक्षं च विन्दति॥ इदमथर्वशीर्षमशिष्याय न देयम्। यो यदि मोहाद्दास्यति। स पापीयान्भवति। सहस्त्रावर्तनाद्यं यं

काममधीत। तं तमनेन साधयेत् ।। अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति ।। चतुर्थ्यामनश्नन् जपति। स विद्यावान्भवति ।। इत्यथर्वणवाक्यम् ।। ब्रह्माद्यावरणं विद्यान्न बिभेति कदाचनेति ।। यो दूर्वाङ्कुरैर्यजति। स वैश्रवणोपमो भवति। यो लाजैर्यजति । स यशोवान् भवति। स मेधावान् भवति।। यो मोदकसहस्त्रेण यजति। स वाञ्छितफलमवाप्नोति ।। यः साज्यसमिद्भिर्यजति । स सर्वं लभते स सर्वं लभते। अष्टौ ब्राह्मणान्सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति ।। महाविघ्नात्प्रमुच्यते। महादोषात्प्रमुच्यते । महाप्रत्यवायात्प्रमुच्यते। स सर्वविद्भवति स सर्वविद्भवति। य एवं वेद इत्युपनिषत् ।।'

।। अथ श्रीसूक्तम् ।।

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।1।।

ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।2।।

ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रवोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ।।3।।

ॐ कां सोऽस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।।4।।

ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनीं शरणं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ।।5।।

ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसा नुदन्तु मा यान्तरा याश्च बाह्या अलक्ष्मी ।।6।।

ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतो राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ।।7।।

CC-0. Shri Satyam Sadhana Kar, Rishikesh. Digitized by Muthulakshmi Research Academy

ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ।।8।।
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।9।।
ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रुपमन्नस्य मयि श्रीः श्रयतां यशः ।।10।।
ॐ कर्दमेन प्रजाः भूताः मयि सम्भव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ।।11।।
ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले ।।12।।
ॐ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।13।।
ॐ आर्द्रां यः करिणीं यष्टिं पिंगलां पद्ममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ।।14।।
ॐ तामावहजातवेदोलक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान् विन्देयं पुरुषानहम्।।15।।
ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ।।16।।'

5.22 अथ कलश पूजनम् -

कलश स्थापना पूर्वक वरुणादिदेवता का पूजन करें। कलश के आधाराभूत अष्टदल कमल को स्पर्श कर इस मन्त्र का पाठ करें - **'ॐ भूरसि भूमिरस्यदितिरसि विश्वधा या विश्वस्य भुवनस्य धर्त्री। पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिꣳसीः।।'** अगले मन्त्र का पाठ करते हुये थोड़े धान्य को कमल पर डालें- **'ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा दीर्घामनुप्रसितिमायुषेधान् देवो वः सविता हिरण्यपाणिः। प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वा महीनाम्पयोसि।।'** उस पर तांबे के कलश को स्थापित करें -

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

'ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विदं वः पुनरूर्ज्जानिवर्तस्वसानः। सहस्रं धुक्ष्वोरुधारा पयस्वतीः पुनर्मा विशताद्रयिः।।'

अब कलश को जल से भरें –

'ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत सदनमासीद।।1।।

ॐ इमम्मे गंगे यमुने सरस्वति शुतुद्रिस्तोमे स च तापरुष्ण्याष्मरुद्वृधे वितस्तयार्जीकीये श्रृणुह्यासुषोमया।।2।।

तत्पश्चात् उसमें गन्ध को समर्पित करें –

'ॐ त्वां गन्धर्वाऽअखनस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत।।'

इसमें सर्वौषधी को डालें –

'ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा। मनैनुवभ्रूणामहं शतं धामानि सप्त च।'

तदनन्तर दूर्वा डालें –

'ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवानो दूर्वेप्रतनु सहस्रेण शतेन च।।'

अब कुशा/दूर्वा को उसमें रखें –

'ॐ पवित्रेस्थो वैष्णव्यै सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्।।'

इसके बाद सप्त मृत्तिका को उसमें डालें –

'ॐ स्योना पृथिवि नो भवानृक्षरान्निवेशनी। यच्छानः शर्म स प्रथा।।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

तत्पश्चात् पूगीफल (सुपारी) को डालें –

'याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः।।'

उसके बाद पंच रत्नों को डालें –

'ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे।।'

तदनन्तर कलश में दक्षिणा डालें –

'ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽआसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।'

अब आम के पांच पत्तों को डालें –

'ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाजऽइत्किलासथ यत्सनवथ पूरुषम्।।

पंच पल्लवों से कलश के अन्दर डाली गयी सामग्री को अच्छी तरह से घुमायें और कलश के गले में मौली को बांधें अथवा लाल वस्त्र से कलश को लपेटें –

'ॐ सुजातो ज्येतिषा सह शर्म वरूथमासदत्स्वः। वासोऽअग्ने विश्वरूपं संव्ययस्व विभावसो।।'

और अब पत्तों को चारों दिशाओं में फैलाकर उस पर पूर्णपात्र को रखें –

'ॐ पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहाऽइषमूर्जं शतक्रतो।।'

इस प्रकार स्थापित कलश में प्राण को प्रतिष्ठित करें –

'मनो जूतिर्जुषतामज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञं समिमन्दधातु। विश्वेदेवास इहमादयन्तामों3 प्रतिष्ठ।।'

यदि पूर्णपात्र पर मूर्ति/यन्त्र को स्थापित नहीं करना है तो एक नारियल (श्रीफल) पर स्वस्तिक लिखकर मौली से बांधकर उस पर रखें –

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

'ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहो रात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यत्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण।।

तत्पश्चात् वरुणदेवता का आवाहन करें -

'ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोद्ध[]रुशं समानऽआयुः प्रमोषीः।।
ॐ भूः वरुणमावाहयामि, ॐ भुवः वरुणमावाहयामि, ॐ स्वः वरुणमावाहयामि, ॐ भूर्भुवःस्वः वरुणमावाहयामि।
ॐ भूर्भुवःस्वः वरुण इह आगच्छ इह तिष्ठ। ॐ वरुणाय नमः।'

अब निम्न मन्त्र से षोडशोपचार पूजन करें- 'ॐ अपांपतिवरुणाय नमः।'

उसके बाद कलश को हाथ से ढ़ककर निम्न मन्त्रों से अभिमन्त्रित करें -

'कलशस्य मुखे विष्णुः कण्ठे रुद्र समाश्रिताः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणा स्मृताः।।
कुक्षौ तु सागराः सर्वे सप्तद्वीपवसुन्धरा। ऋग्वेदोऽथ यजुर्वेद सामवेदो ह्यथर्वणः।।
अंगैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः। आयान्तु देव पूजार्थं दुरितक्षयकारकाः।।
सर्वे समुद्राः सरितः तीर्थानि जलदानदाः। सर्वेऽत्र प्रतितिष्ठन्तु मम कल्याणकारकाः।।'

इस प्रकार कलशस्थ जल को अभिमन्त्रित कर प्रार्थना करे -

'देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि सदा कुम्भः विधृता विष्णुना स्वयम्।।1।।
आयान्तु देव पूजार्थं दुरितक्षयकारकाः। त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।।2।।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।।3।।

CC-0. Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।।4।।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भवः। सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा।।5।।
पाशपाणेः नमस्तुभ्यं पद्मिनीजीवनायक। प्रधानपूजनं यावत्तावत्त्वं सन्निधौ भव।।6।।
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय। सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।।7।। '

5.23 पुण्याहवाचनम् –

हाथ जोड़कर प्रार्थना करें–

'ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमंगलाय। सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते।।
पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक। पुण्याहवाचनं यावत्तावत्त्वं संन्निधौ भव।।'

जमीन पर घुटने टेक कर अपनी अंजलि को खिले हुये कमलाकार में सिर पर धारण कर बैठें और उस कमलाकार में पुटित अंजलि में ब्राह्मण कलश रखें। तब यजमान प्रार्थना करें –

'त्रीणि पदा विचक्रमे विष्णुर्गोपाऽअदाभ्यः। अतो धर्माणि धारयन्।।
तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घायुरस्त्विति ब्रुवन्तु।' द्विज जवाब दें– **'पुण्यं पुण्याहं दीर्घायुरस्तु'।**

ब्राह्मण के हाथ में कलश देकर यजमान कहे – **'सुप्रोक्षितमस्तु, ॐ शिवा आपः सन्तु',** द्विज जवाब दें – **'सन्तु शिवा आपः'।**

द्विज के हाथ में पुष्प देकर पुनः यजमान कहे – **'सौमनस्यमस्तु',** द्विज जवाब दें – **'अस्तु सौमनस्यम्'।**

द्विज के हाथ में अक्षत देकर पुनः यजमान कहे – **'ॐ अक्षतं चारिष्टं चास्तु',** द्विज जवाब दें –**'अस्त्वक्षतमरिष्टं चास्तु'।**

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

द्विज के हाथ में गन्ध देकर पुनः यजमान कहे – **'ॐ गन्धाः पान्तु'**, द्विज जवाब दें – **'अस्तु गन्धं सौमंगल्यं चास्तु'**।

द्विज के हाथ में पुनः अक्षत देकर यजमान कहे – **'ॐ अक्षताः पान्तु'** द्विज जवाब दें – **'ॐ आयुष्यमस्तु'**।

द्विज के हाथ में पुनः पुष्प देकर यजमान कहे – **'ॐ पुष्पाणि पान्तु'**, द्विज जवाब दें – **'ॐ सौश्रियमस्तु'**।

द्विज के हाथ में ताम्बूल देकर पुनः यजमान कहे – **'ॐ ताम्बूलानि पान्तु'**, द्विज जवाब दें – **'ॐ ऐश्वर्यमस्तु'**।

द्विज के हाथ में दक्षिणा देकर पुनः यजमान कहे – **'दक्षिणाः पान्तु'**, द्विज जवाब दें – **'ॐ बहुधनमस्तु'**।

द्विज के हाथ में जल देकर पुनः यजमान कहे – **'ॐ पुनरत्रापः पान्तु'**, द्विज जवाब दें – **'ॐ स्वर्चितमस्तु'**।

अब यजमान ब्राह्मणों के सामने हाथ जोड़कर कहे – **'ॐ श्रीर्यशोविद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्त्विति ब्रुवन्तु'**,

अब द्विज जवाब में यजमान पर जल छिड़ककर अभिषेक करें –

'ॐ श्रीर्यशोविद्या विनयो वित्तं बहुपुत्रं चायुष्यं चास्तु दीर्घमायुः पुष्टिस्तुष्टिश्चास्तु'।

पुनः यजमान द्विजों के हाथ में अक्षत देकर कहे –

'यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोंकारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये। ॐ वाच्यतांऽ',

यजमान प्रार्थना करे (यजमान पर अक्षत छिडकते हुये द्विज आशीर्वचन दें) –

'करोतु स्वास्ति ते ब्रह्मा स्वस्ति चापि द्विजातयः। सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा।।1।।
ययातिर्नहुषश्चैव धुन्धुमारो भगीरथः। तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः।।2।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

स्वस्ति तेऽस्तु द्विपादेभ्यस्चतुष्पादेभ्य एव च। स्वस्त्यस्त्वापादकेभ्यश्चसर्वेभ्यः स्वस्ति ते सदा।।3।।
स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा। करोतु स्वस्ति वेदादिर्नित्यं तव महामखे।।4।।
लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ। असितो देवलश्चैव विश्वामित्रस्तथाऽंगिराः।।5।।
वशिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा। धाता विधाता लोकेशो दिशश्च सदिगीश्वराः।।6।।
स्वस्ति तेऽद्य प्रयच्छन्तु कार्तिकेयश्च षण्मुखः विवस्वान् भगवान्स्वस्ति करोतु तव सर्वदा।।7।।
दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः। अधस्ताद् धरणीं चाऽसौ नागो धारयते हि सः।।8।।
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु। स्वस्तिरेव स्वस्तिरस्तु तुभ्यं सदा स्वस्तिरेव।।9।।

ॐ भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरंगैस्तुश्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः।1। देवानां भद्रा सुमतिर्ऋजूयतान्देवानाꣳरातिरभिनो निवर्तताम्। देवानाꣳसख्यमुपसेदिमा वयन्देवानऽआयुः प्रतिरन्तु जीवसे।2। न तदक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳह्येतत्। यो बिभर्ति दाक्षायणꣳहिरण्यꣳस देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः।3। दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम्। अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात्।4। द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनस्य प्रियं सत्। द्रविणोदा वीरवतीमिशन्नो द्रविणोदा रासते दीर्घमायुः।5। द्रविणोदाः पिपीषति जुहोति प्र च तिष्ठत। नेष्टादृतुभिरिष्यत।।6।। सविता त्त्वा सवानाꣳसुवितामग्निर्गृहपतीनाꣳसोमो वनस्पतीनाम्। बृहस्पतिर्वाचऽइन्द्रो ज्येष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम्।।7।। सविता पश्चात्तत्सविता पुरस्तात्सवितोत्तरात्सविताधरातात्। सविता नः सुवतु सर्वतातिं सविता नो रासतान्दीर्घमायुः।8। नवो नवो भवति जायमानोऽह्नान्केतुरुषसामेत्यग्रम्। भागन्देवेभ्यो विदधात्ययं प्रचन्द्रमास्तिरते दीर्घमायुः।9। उच्चा ते जातमन्धसो दिविसद्भूम्याददे।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

उग्रꣳशर्म महिश्रवः।।10।। उच्चा दिवि दक्षिणावन्तोऽअस्थुर्येऽअश्वदाः सह ते सूर्येण। हिरण्यदाऽअमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्त आयुः।11। उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ2ऽइयक्षते।।12।।'

अब यजमान कहे - '**व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम्**', द्विज बोलें - '**समाहितमनसः स्मः**'। पुनः यजमान कहे - '**प्रसीदन्तु भवन्तः**', द्विज बोलें - '**प्रसन्नाः स्मः**'।

अब से आगे यजमान के प्रत्येक वचन के बाद द्विज केवल '**अस्तु**' बोलें और यजमान कलश पर चावल डालता जाय -

ॐ शान्तिरस्तु, ॐ पुष्टिरस्तु, ॐ तुष्टिरस्तु, ॐ वृद्धिरस्तु, ॐ अविघ्नमस्तु, ॐ आयुष्यमस्तु, ॐ आरोग्यमष्तु, ॐ शिवं कर्मास्तु, ॐ कर्मसमृद्धिरस्तु, ॐ वेदसमृद्धिरस्तु, ॐ शास्त्रसमृद्धिरस्तु, ॐ धनधान्यसमृद्धिरस्तु, ॐ पुत्रपौत्रसमृद्धिरस्तु, ॐ इष्टसंपदस्तु।'

अब चावल को एक पृथक्पात्र में डालें - **ॐ अरिष्टनिरसनमस्तु।**

अब चावल बाहर डालें - **ॐ यत्पापं यद्रोगं नः अशुभं अकल्याणं तद्दूरे प्रतिहतमस्तु।**

पुनः चावल कलश पर डालें - **ॐ यच्छ्रेयस्तदस्तु, ॐ उत्तरे कर्मणि निर्विघ्नमस्तु, ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु, ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम्, ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु।'**

अब <u>उदकसेक कर्म</u> करें -

ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम्, ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम्, ॐ दुर्गापांचाल्यौ प्रीयेताम्, ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्, ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम्, ॐ माहेश्वरीपुरोगा

CC-0. Shri Satya Sai Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

उमामातरः प्रीयन्ताम्, ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम्, ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम्, ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्, ॐ श्रीसरस्वत्यौ प्रीयेताम्, ॐ श्रद्धामेधे प्रीयेताम्, ॐ भगवती कात्यायनी प्रीयताम्, ॐ भगवती माहेश्वरी प्रीयताम्, ॐ भगवती ऋद्धिकरी प्रीयताम्, ॐ भगवती सिद्धिकरी प्रीयताम्, ॐ भगवती पुष्टिकरी प्रीयताम्, ॐ भगवती तुष्टिकरी प्रीयताम्, ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्, ॐ सर्वा कुलदेवताः प्रीयन्ताम्, ॐ सर्वा ग्रामदेवताः प्रीयन्ताम् ।

अब चावल बाहर डालें- ॐ हताश्च ब्रह्मद्विषः, ॐ हताश्च परिपन्थिनः, ॐ हताश्च विघ्नकर्तारः, ॐ शत्रवः पराभवं यान्तु, ॐ शाम्यन्तु घोराणि, ॐ शाम्यन्तु पापानि, ॐ शाम्यन्त्वीतयः।

पुनः चावल कलश पर डालें - ॐ शुभानि वर्द्धन्ताम्, ॐ शिवा आपः सन्तु, ॐ शिवा ऋतवः सन्तु, ॐ शिवा ओषधयः सन्तु, ॐ शिवा नद्यः सन्तु, ॐ शिवा गिरयः सन्तु, ॐ शिवा अतिथयः सन्तु, ॐ शिवा अग्नयः सन्तु, ॐ शिवा आहुतयः सन्तु, ॐ अहोरात्रे शिवे स्याताम्, ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम्, ॐ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्, ॐ भगवन्नारायणः प्रीयताम्, ॐ भगवान्पर्जन्यः प्रीयताम्, ॐ भगवान्स्वामी महासेनः प्रीयताम्।'

अब यजमान कहे - 'ॐ पुण्याहकालान्वाचयिष्ये', द्विज कहें - 'ॐ वाच्यताम्'।

यजमान कहे - 'ब्राह्मयं पुण्यं महर्यच्च (महद्यच्च) सुष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः।1।

'भो ब्राह्मणाः मया क्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।'

द्विज तीन बार कहे - 'ॐ पुण्याहम्'।

यजमान कहे – 'ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा।1।
पृथिव्यामुद्धृतायां तु यत्कल्याणं पुराकृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः।2।
भो ब्राह्मणाः मया क्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु',

द्विज तीन बार कहे – 'ॐ कल्याणमस्तु'।

यजमान कहे – 'ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्रायाचार्याय च स्वाय चारणाय च।
प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु।1।
सागरस्य यथा वृद्धिर्महालक्ष्यादिभिः कृता। संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः।2।
भो ब्राह्मणाः मया क्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु'।

द्विज तीन बार कहे – 'ॐ ऋद्ध्यताम्'।

यजमान कहे – 'ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम। दिवम्पृथिव्याऽअध्यारूहामाविदामदेवान्स्व-
र्ज्योतिः।1।
स्वस्तिस्तु या विनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं तां च स्वस्ति ब्रुवन्तु नः।2।
भो ब्राह्मणाः मया क्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः आयुष्मते स्वस्तिं भवन्तो ब्रुवन्तु',

द्विज तीन बार कहे – 'ॐ आयुष्मते स्वस्ति'।

यजमान कहे – 'ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो
बृहस्पतिर्दधातु।1। समुद्रमथनाज्जाता जगदानन्दकारिका। हरिप्रिया च मांगल्या तां श्रियं च ब्रुवन्तु

CC-0. Shri Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

न:।2। भो ब्राह्मणाः मया क्रियमाणस्य दुर्गापूजनाख्यस्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु',

द्विज तीन बार कहे – 'अस्तु श्रीः'।

यजमान कहे – 'ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण।1।
मृकण्डुसूनोरायुर्यद् ध्रुवलोमशयोस्तथा। आयुषा तेन संयुक्ता जीवेम शरदः शतम्।।1।।

द्विज कहे – 'ॐ शतं जीवन्तु भवन्तः'।

यजमान कहे – 'ॐ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा यरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ।।1।। शिवगौरीविवाहे या या श्रीरामे नृपात्मजे। धनत्स्य गृहे या श्रीरस्माकं साऽस्तु सद्मनि।।1।।'

द्विज कहे – 'ॐ अस्तु श्रीः'।

यजमान कहे – 'ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाꣳरूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा।।1।।
प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट्। भगवाञ्छाश्वतो नित्यं नो वै रक्षन्तु सर्वतः।।1।।
ॐ भगवान् प्रजापतिः प्रीयताम्। ॐ प्रजापते न त्वदे तान्यन्यो विश्वा रूपाणि परि ता बभूव।
यत्कामास्ते जुहुमस्तन्नोऽअस्त्वयममुष्य पितासावस्य पिता वयꣳस्याम पतयो रयीणाꣳस्वाहा।।2।।
आयुष्मते स्वस्तिमते यजमानाय दाशुषे। श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः'।।1।।

द्विज कहे – 'ॐ आयुष्मते स्वस्ति'।

यजमान कहे – 'ॐ प्रतिपन्थामपद्महि स्वस्ति गामनेहसम्। येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु।।1।।'

द्विज कहे – 'ॐ स्वस्तिवाचनसमृद्धिरस्तु'।

यजमान कहे – अस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात्श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु',

द्विज तीन बार कहे – 'ॐ अस्तु परिपूर्णः'।

यजमान कहे – 'ॐ कृतस्य स्वस्तिवाचनकर्मणः समृद्ध्यर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्यो इमां दक्षिणां विभज्य दातुमुत्सृजे'।

अब अविधुर चार द्विज दूर्वा और आम के पत्तों से <u>अभिषेक</u> कर्म करें – (अभिषेक काल में पत्नी यजमान के बायीं ओर बैठे)

'ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।1।

ॐ पंच नद्यः सरस्वतीमपि यन्ति सस्रोतसः। सरस्वती तु पंचधासो देशेऽअभवत्सरित्।2।

ॐ वरुणस्योत्तभनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋतसदन्यसि
वरुणस्यऽऋतसदनमसि वरुणस्यऽऋत सदनमासीद ।3।

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा।4।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्।
सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिशिंचाम्यसौ। 5।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिंचामि।6।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्।

अश्विनोर्भैषज्येन तेजसा ब्रह्मवर्चसयाभिषिंचामि।।

सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिंचामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिंचामि।7।

ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्ना आसुव।8।

ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः। सचेतसो विश्वे देवा यज्ञम्प्रावन्तु नः शुभे।9।

ॐ त्वं यविष्टदाशुषो नृःपाहि श्रृणुधी गिरः। रक्षा तोकमुत्मना।10।

ॐ अन्नपतेऽन्नस्य नो धेह्यनमीवस्यशुष्मिणः प्रप्रदातारन्तारिषऽऊर्जन्नो धेहि द्विपदे शं चतुष्पदे।11।

ॐ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।

वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।12।

ॐ यतो यतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः।13।

अमृताभिषेकोऽअस्तु। शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु।14।'

इसके बाद तीन अथवा पांच पुत्रवती वृद्ध सुवासिनियों से आरती कराना है –

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्यऽआयुर्मेदाः पुत्रवती दक्षिणत इन्दस्याधिपत्ये प्रजामेदाः विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्येऽ ओजोमेदा विश्वाभ्यो मानाष्ट्राभ्यस्पाहि मनारश्वोसि।। अनेन पुण्याहवाचनेन भगवती दुर्गा प्रीयताम्'।।

अब गौर्यादिषोडशमातृकाओं, षड्विनायकमातृकाओं, श्री आदि सप्तघृतमातृकाओं, सप्तस्थलमातृकाओं, आदि का पूजन करें।

5.24 षोडशमातृका स्थापनं पूजनं :-

आग्नेय्यां प्रतिमासु अक्षत पुञ्जेषु प्राक्संस्थं उदक्संस्थं वा मातृस्थापनम् ।।

सर्वप्रथम गौर्यादि षोडश मातृका के समक्ष गणपति की स्थापना करें

आ.कु.देवता 16	लोकमाता 12	देवसेना 08	मेधा 04
तुष्टि 15	माता 11	जया 07	शची 03
पुष्टि 14	स्वाहा 10	विजया 06	पद्मा 02
धृति 13	स्वधा 09	सावित्री 05	गणेश गौरी 01

1. ॐ गणानां त्वा गणपतिꣳहवामहे प्रियाणांत्वा प्रियपतिꣳहवामहे निधीनां त्वा निधिपतिꣳहवामह वसो मम । आहमजानि गर्भध मा त्वमजासि गर्भधम् । ॐ नमो गणेभ्यो गणपतिभ्यश्चवो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्चवो नमो नमो गृत्सेभ्योगृत्स पतिभ्यश्चवो नमो नमो विरुपेभ्यो विश्वरुपेभ्यश्चवो नमो नमः । हे हेरम्ब त्वमेह्येहि अम्बिकात्र्यम्बकात्मज। सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः । ॐ भूर्भुवःस्वः गणपतये नमः । ॐ भूर्भुवःस्वः गणपतिमावाहयामि स्थापयामि । ॐ भूर्भुवः स्वः भो गणपते इहागच्छ इह तिष्ठ । तथा ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरञ्च प्रयन्त्स्वः ।1। ॐ हेमाद्रितनयां देवीं वरदां शंकर प्रियाम् । लम्बोदरस्य जननीं गौरीमावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः गौर्य्यैनमः । ॐ भूर्भुवःस्वः गौरीमावाहयामि स्थापयामि । ॐ भूर्भुवः स्वः भो गौरि इहागच्छ इह तिष्ठ । – नैर्ऋत्ये।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

2. ॐ हिरण्यरूपा उषसो विरोक उभाविन्द्रा उदिथः सूर्यश्च । आरोहतं वरुण मित्र गर्त ततश्च क्षाथामदितिं दितिं च मित्रोऽसि वरणोऽसि ।1। पद्माभां पद्मवदनां पद्मनाभोरुसं स्थिताम् । जगत्प्रियां पद्मवासां पद्मामावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः पद्मायैनमः । ॐ भूर्भुवः स्वः पद्मामावाहयामि स्थापयामि । ॐ भूर्भुवः स्वः भो पद्मा इहागच्छ इह तिष्ठ ।- तदुपरि दक्षिणे।

3. ॐ निवेशनः सङ्गमनोवसूनां विश्वा रुपाऽभिचष्टे शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् ।1। दिव्यरुपां विशालाक्षीं शुचिकुण्डलधारिणीम् । रक्तमुक्ताद्यलंकारां शचीमावाहयाम्यहम् ।1। ॐभूर्भुवःस्वः शच्यैनमः । ॐ भूर्भुवःस्वः शचीमावाहयामि स्थापयामि पूजयामि । ॐ भूर्भुवःस्वःभो शची इहागच्छ इह तिष्ठ।- तदुपरि दक्षिणे।

4. ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः। मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा।1। विश्वेऽस्मिन् भूरिवरदां जरां निर्जरसेविताम्।। बुद्धिप्रबोधिनीं सौम्यां मेधामावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः मेधायैनमः । ॐ भूर्भुवःस्वः मेधामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो मेधा इहागच्छ इह तिष्ठ ।- तदुपरि आग्नेये।

5. ॐ सविता त्त्वा सवानाꣳसुवतामग्निर्गृहपतीनाꣳसोमो वनस्पतीनाम् । वृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ।1। जगत्सृष्टिकरीं धात्रीं देवीं प्रणवमातृकाम् । वेदगर्भां यज्ञमयीं सावित्रीमावाहयाम्यहम् ।। ॐ भूर्भुवःस्वः सावित्र्यै नमः । ॐ भूर्भुवःस्वः सावित्रीमावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो सावित्री इहागच्छ इह तिष्ठ। - पुनरधः गणेशस्य वामे।

6. ॐ विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ 2ऽउत । अनेशन्नस्य या इषवः आभुरस्य निषङ्गधिः।1। सर्वास्त्रधारिणीं

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

देवीं देवानामभयप्रदाम् । सर्वदेवस्तुतां वन्द्यां विजयामावाहयाम्यहम्।1 । ॐभूर्भुवःस्वः विजयायै नमः । ॐ भूर्भुवःस्वः विजयामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वः भो विजया इहागच्छ इह तिष्ठ ।- तदुपरि।

7. ॐ बह्वीनां पिता बहुरस्य पुत्राश्चिाकृणोति समनावगत्य । इषुधिः सङ्का पृतनाश्च सर्वा पृष्ठे निनद्धो जयति प्रसूतः ।1। सुरारिमथिनीं देवीं देवानामभयप्रदाम् । त्रैलोक्यवन्दितां शुभ्रां जयामावाहयाम्यहम् ।।1 ॐ भूर्भुवःस्वः जयायै नमः । ॐ भूर्भुवःस्वः जयामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो जया इहागच्छ इह तिष्ठ ।- तदुपरि।

8. ॐ इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देवसेना नामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ।1। मयूरवाहनां देवीं खड्गशक्तिधनुर्धराम् । आवाहयामि देवसेनां तारकासुरमर्दिनीम् ।1। ॐ भूर्भुवःस्वः देवसेनायै नमः । ॐ भूर्भुवःस्वः देवसेनामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वः भो देवसेना इहागच्छ इह तिष्ठ । - तदुपरि।

9. ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः अक्षन्पितरो मीमदन्त पितरो तीतृपन्त पितरो पितरः शुन्धद्ध्वम्।1। अग्रजः सर्वदेवानां कव्यार्थं या प्रतिष्ठिता । पितृणां तृप्तिदां देवीं स्वधामावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः स्वधायै नमः । ॐ भूर्भुवःस्वः स्वधामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो स्वधा इहागच्छ इह तिष्ठ । - पुनरधः सावित्र्याः वामे।

10. ॐ स्वाहा प्राणेभ्यः साधिपतिकेभ्यः । पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा, वायवे स्वाहा, दिवे स्वाहा, सूर्याय स्वाहा ।1। हविर्गृहित्वा सततं देवेभ्यो या प्रयच्छति । तां दिव्यरुपां वरदां स्वाहामावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः स्वाहायै नमः । ॐ भूर्भुवःस्वः स्वाहामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वः भो स्वाहा इहागच्छ इह तिष्ठ ।- तदुपरि।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

11. ॐ आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वं हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एमि । दीक्षा तपसोस्तनूरसि तां त्वा शिवाश्सग्मां परिदधे भद्रं वर्णं पुष्यन् ।1। आवाहयाम्यहं मातृः सकला लोकपूजिताः। सर्व कल्याणरुपिण्यो वरदा दिव्यभूषणा ।1। ॐ भूर्भुवःस्वः मातृभ्यो नमः । ॐ भूर्भुवःस्वः मातृरावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो मातर इहागच्छ इह तिष्ठ ।। - तदुपरि।

12. ॐ रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णञ्च मे पूर्णतरञ्च मे कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मेऽक्षुच्च मे यज्ञेन कल्पन्ताम् ।1। आवहयामि लोकमातृः जयन्ती प्रमुखाः शुभाः। नानाऽभीष्ट प्रदाःशान्ताः सर्वलोक हितावहाः।1। ॐ भूर्भुवःस्वः लोकमातृभ्यो नमः । ॐ भूर्भुवःस्वः लोकमातृरावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो लोकमातरः इहागच्छ इह तिष्ठ ।- तदुपरि।

13. ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ।1। सर्वहर्षकरीं देवीं भक्तानामभयप्रदाम् । हर्षोत्फुल्लास्यकमलां धृतिमावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः धृत्यै नमः । ॐ भूर्भुवःस्वः धृतीमावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो धृती इहागच्छ इह तिष्ठ । - पुनरधः स्वधया वामे।

14. ॐ अंगान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती । इन्द्रस्य रुपं शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ।1। पोषयन्ती जगत्सर्वं स्वदेहप्रभवैर्नवैः । शाकैः फलैः जलैः रत्नैः पुष्टिमावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः पुष्ट्यै नम । ॐ भूर्भुवःस्वः पुष्टिमावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो पुष्टि इहागच्छ इह तिष्ठ।- तदुपरि।

15. ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेद । स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः।1।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

देवैराराधितां देवीं सदा सन्तोषकारिणीम् । प्रसाद सुमुखीं देवीं तुष्टिमावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः तुष्ट्यै नमः । ॐ भूर्भुवःस्वः तुष्टिमावाहयामि स्थापयामि। ॐ भूर्भुवःस्वः भो तुष्टि इहागच्छ इह तिष्ठ। - तदुपरि।

16. ॐ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा । चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ।1। पत्तने नगरे ग्रामे विपिने पर्वते गृहे । नाना जाति कुलेशानीं दुर्गामावाहयाम्यहम् ।1। ॐ भूर्भुवःस्वः आत्मनः कुलदेवतायै नमः। ॐ भूर्भुवःस्वः आत्मनः कुलदेवतामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो आत्मनः कुलदेवता इहागच्छ इह तिष्ठ ।- तदुपरि। अथवा नाममन्त्रों से आवाहन करें -

1. ॐ भूर्भुवःस्वः गणपतये नमः । ॐ भूर्भुवःस्वः गणपतिमावाहयामि स्थापयामि ।
   ॐ भूर्भुवः स्वः भो गणपते इहागच्छ इह तिष्ठ । और ॐ भूर्भुवःस्वः गौर्य्यै नमः ।
   ॐ भूर्भुवःस्वः गौरीमावाहयामि स्थापयामि । ॐ भूर्भुवः स्वः भो गौरि इहागच्छ इह तिष्ठ । - नैर्ऋत्ये।
2. ॐ भूर्भुवःस्वः पद्मायै नमः । ॐ भूर्भुवः स्वः पद्मामावाहयामि स्थापयामि ।
   ॐ भूर्भुवः स्वः भो पद्मे इहागच्छ इह तिष्ठ । - तदुपरि दक्षिणे।
3. ॐ भूर्भुवः स्वः शच्यैनमः । ॐ भूर्भुवःस्वः शचींमावाहयामि स्थापयामि पूजयामि ।
   ॐ भूर्भुवःस्वः भो शचि इहागच्छ इह तिष्ठ। - तदुपरि दक्षिणे।
4. ॐ भूर्भुवःस्वः मेधायैनमः । ॐ भूर्भुवःस्वः मेधामावाहयामि स्थापयामि ।
   ॐ भूर्भुवःस्वः भो मेधा इहागच्छ इह तिष्ठ । -तदुपरि आग्नेये।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

5. ॐ भूर्भुवःस्वः सावित्र्यै नमः । ॐ भूर्भुवःस्वः सावित्रींमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो सावित्री इहागच्छ इह तिष्ठ। - पुनरधः गणेशस्य वामे।

6. ॐ भूर्भुवःस्वः विजयायै नमः ।ॐ भूर्भुवःस्वः विजयामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो विजया इहागच्छ इह तिष्ठ । - तदुपरि।

7. ॐ भूर्भुवःस्वः जयायै नमः । ॐ भूर्भुवःस्वः जयांमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो जया इहागच्छ इह तिष्ठ । - तदुपरि।

8. ॐ भूर्भुवःस्वः देवसेनायै नमः । ॐ भूर्भुवःस्वः देवसेनामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो देवसेना इहागच्छ इह तिष्ठ । - तदुपरि।

9. ॐ भूर्भुवःस्वः स्वधायै नमः । ॐ भूर्भुवःस्वः स्वधामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो स्वधा इहागच्छ इह तिष्ठ । - पुनरधः सावित्र्याः वामे।

10. ॐ भूर्भुवःस्वः स्वाहायै नमः । ॐ भूर्भुवःस्वः स्वाहामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो स्वाहा इहागच्छ इह तिष्ठ । - तदुपरि।

11. ॐ भूर्भुवःस्वः मातृभ्यो नमः । ॐ भूर्भुवःस्वः मातरमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो मातर इहागच्छ इह तिष्ठ ।। - तदुपरि।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

12. ॐ भूर्भुवःस्वः लोकमातृभ्यो नमः । ॐ भूर्भुवःस्वः लोकमातरमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो लोकमातरः इहागच्छ इह तिष्ठ । - तदुपरि।

13. ॐ भूर्भुवःस्वः धृत्यै नमः । ॐ भूर्भुवःस्वः धृतींमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो धृती इहागच्छ इह तिष्ठ । पुनरधः स्वधया वामे।

14. ॐ भूर्भुवःस्वः पुष्ट्यै नम । ॐ भूर्भुवःस्वः पुष्टींमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो पुष्टी इहागच्छ इह तिष्ठ।- तदुपरि।

15. ॐ भूर्भुवःस्वः तुष्ट्यै नमः । ॐ भूर्भुवःस्वः तुष्टींमावाहयामि स्थापयामि।
ॐ भूर्भुवःस्वः भो तुष्टी इहागच्छ इह तिष्ठ। - तदुपरि।

16. ॐ भूर्भुवःस्वः आत्मनः कुलदेवतायै नमः । ॐ भूर्भुवःस्वः आत्मनः कुलदेवतामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो आत्मनः कुलदेवता इहागच्छ इह तिष्ठ । - तदुपरि।

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञꣳसमिमं दधातु। विश्वेदेवा स इह मादयन्तामों3 प्रतिष्ठ।1।
ॐ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन ।1।
श्री गणेशपूर्वकगौर्यादिषोडशमातृकाः सुप्रतिष्ठिताः वरदाः भवन्तु ।।

पंचोपचार अथवा दशोपचार अथवा षोडशोपचारों से पूजन करें-

'ॐ भूर्भुवःस्वः षोडशमातृकादेवताभ्यो नमः सर्वोपचारार्थे गन्धादीन्समर्पयामि।' इति सम्पूज्य प्रार्थयेत् -

'ब्रह्माणी कमलेन्दु सौम्य वदना माहेश्वरी लीलया। कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

वाराही घनघोर घुर्घुरमुरवी चैंद्री च वज्रायुधा। चामुण्डा गणनाथ रुद्र सहिताःरक्षन्तु भोः मातरः।1।
ॐ गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः।।
ह्रष्टि पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता । गणेशेनाधिका ह्यौता वृद्धौ पूज्यास्तु षोडशः।2।
आयुरारोग्यमैश्वर्यं ददध्वं मातरो मम । निर्विघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपाः ।3।
अनया पूजया षोडशमातृकादेवता साङ्गा सपरिवारा सायुधा सशक्तिका सवाहना प्रीयन्ताम् न मम ।।'

5.25 सप्तघृतमातृकापूजनम् - तत्र प्रमाणं -

'तत्पुरः सन्निधाने वा कुड्ये रेखा घृतेन च । धारालिंगेन मन्त्रेण पञ्च वा सप्त वा लिखेत् ।1।
गृहनिर्गमवामे च वसोर्द्धारा वितर्दिका । कार्या विवाहे विद्वद्भिः गृहे व पूर्व-दक्षिणे ।2।'

स्थलप्रमाणम् - गृहे वै पश्चिमद्वारे तथा उत्तर एव च । सप्तघृतमातृवेदि गृहनिर्गमदक्षिणे ।।'

विधिः - 'कुड्ये आवाहित मातृणामुपरि सिन्दूराक्तेन घृतेन भित्तौ धारां दद्यात् ।
नागवल्लीदले सकुंकुमं ससिन्दूरं वा तप्तं घृतं गृहीत्वा तेन प्राक्संस्था उदक्संस्था वा प्रदेशमात्रीः धाराः कुर्यात् । तासां शिरांसि च मिथो मेलनीयानि । एकीकृत्योद्ध्वभागे तु कुंकुमेन गुडादिना इति ।। अर्थात् अग्निकोण में दीवाल या पट्टे पर कुंकुम (रोली) से क्रमशः ऊपर से नीचे तक एक, दो, तीन, चार, पांच, छः एवं सात बिंदुओं को लिखकर उन पर पूजा करे।

ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ।।

इस मन्त्र के सुप्वा तक का पाठ पढ़कर घृतधारा करके कामधुक्षः ऐसा पढ़कर गुड़ से उनको मिला देवे । वहां देवताओं का आवाहन करे

1. ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूनां रुपमन्नस्य रसो यशः श्री श्रयतां मयि स्वाहा ।।
   ॐ भूर्भुवःस्वः श्रियै नमः। ॐ भूर्भुवःस्वः श्रियमावाहयामि स्थापयामि। ॐ भूर्भुवःस्वःभो श्री इहागच्छ इह तिष्ठ ।
2. ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रुपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण ।।
   ॐ भूर्भुवःस्वः लक्ष्म्यै नमः। ॐ भूर्भुवःस्वः लक्ष्मीमावाहयामि स्थापयामि। ॐ भूर्भुवःस्वःभो लक्ष्मी इहागच्छ इह तिष्ठ ।
3. ॐ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ।
   ॐ भूर्भुवःस्वः धृत्यै नमः । ॐ भूर्भुवःस्वः धृतिमावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो धृति इहागच्छ इह तिष्ठ ।
4. ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः । मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ।।
   ॐ भूर्भुवःस्वः मेधायै नमः । ॐ भूर्भुवःस्वः मेधामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो मेधा इहागच्छ इह तिष्ठ।
5. ॐ प्राणाय स्वाहाऽपानाय स्वाहा व्यानाय स्वाहा चक्षुषे स्वाहा । श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा ।
   ॐ भूर्भुवःस्वः स्वाहायै नमः। ॐ भूर्भुवःस्वः स्वाहामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो स्वाहा इहागच्छ इह तिष्ठ ।
6. ॐ आयङ्गौः पृश्निरवक्रमीदसन्मातरं पुरः । पितरञ्च प्रयन्त्स्वः ।। ॐ भूर्भुवःस्वः प्रज्ञायै नमः।
   ॐ भूर्भुवःस्वः प्रज्ञामावाहयामि स्थापयामि । ॐ भूर्भुवःस्वः भो प्रज्ञा इहागच्छ इह तिष्ठ।
7. ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती यज्ञं वष्टु धिया वसुः।। ॐ भूर्भुवःस्वः सरस्वत्यै नमः।
   ॐ भूर्भुवःस्वः सरस्वतीमावाहयामि स्थापयामि । ॐ भूर्भुवःस्वःभो सरस्वती इहागच्छ इह तिष्ठ।

अथवा नाममन्त्रों से आवाहनादि करें –

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

1. ॐ भूर्भुवःस्वः श्रियै नमः। ॐ भूर्भुवःस्वः श्रियमावाहयामि स्थापयामि।
ॐ भूर्भुवःस्वःभो श्री इहागच्छ इह तिष्ठ ।
2. ॐ भूर्भुवःस्वः लक्ष्म्यै नमः । ॐ भूर्भुवःस्वः लक्ष्मीमावाहयामि स्थापयामि पूजयामि ।
ॐ भूर्भुवःस्वःभो लक्ष्मी इहागच्छ इह तिष्ठ ।
3. ॐ भूर्भुवःस्वः धृत्यै नमः । ॐ भूर्भुवःस्वः धृतिमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वःभो धृती इहागच्छ इह तिष्ठ ।
4. ॐ भूर्भुवःस्वः मेधायै नमः । ॐ भूर्भुवःस्वः मेधामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वःभो मेधा इहागच्छ इह तिष्ठ।
5. ॐ भूर्भुवःस्वःस्वाहायै नमः। ॐ भूर्भुवःस्वः स्वाहामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वःभो स्वाहा इहागच्छ इह तिष्ठ ।
6. ॐ भूर्भुवःस्वः प्रज्ञायै नमः। ॐ भूर्भुवःस्वः प्रज्ञामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो प्रज्ञा इहागच्छ इह तिष्ठ।
7. ॐ भूर्भुवःस्वः सरस्वत्यै नमः। ॐ भूर्भुवःस्वःसरस्वतीमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वःभो सरस्वती इहागच्छ इह तिष्ठ ।।

ॐ श्रीः लक्ष्मीः धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती । माङ्गल्येषु प्रपूज्यन्ते सप्तैताः घृतमातरः ।।
सप्तघृतमातृकादेवताभ्यो नमः । इत्यावाह्य प्रतिष्ठापयेत् ।

ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञꣳसमिमं दधातु । विश्वेदेवा स इह मादयन्ता मो 3 प्रतिष्ठ। सप्तघृतमातृकादेवता सुप्रतिष्ठिताः वरदाः भवन्तु । पंचोपचार अथवा दशोपचार अथवा षोडशोपचारों से पूजन करें -

'ॐ भूर्भुवःस्वः सप्तघृतमातृकादेवताभ्यो नमः सर्वोपचारार्थे गन्धादीन्समर्पयामि।' सम्पूज्य प्रार्थयेत् -

यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः। कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ।।

अनया पूजया सप्तघृतमातृकादेवता साङ्गा सपरिवारा सायुधा सशक्तिका सवाहना प्रीयन्ताम् न मम ।।

5.26 सप्तस्थलमातृका पूजनम्

तण्डुलपुञ्जेषु पूगीफलेषु वा ब्राह्मी आदि सप्तस्थलमातृका -

1. 'ॐ साऽब्रवीदहं ब्रह्मस्वरूपिणी। मत्तः प्रकृतिपुरुषात्मक जगच्छून्यं चाशून्यं च।। ॐ भूर्भुवस्वः ब्राह्म्यै नमः। ब्राह्मीमावाहयामि स्थापयामि। भो ब्राह्मि इह आगच्छ इह तिष्ठ।।'
2. 'ॐ अहं रुद्रेभिर्वसुभिश्चराम्यादित्यैरुत विश्वदेवैः। अहं मित्रावरुणावुभा बिभर्म्यहमिन्द्राग्नी अहमश्विनावुभौ।। ॐ भूर्भुवस्वः माहेश्वर्यै नमः। माहेश्वरीमावाहयामि स्थापयामि। भो माहेश्वरि इह आगच्छ इह तिष्ठ।।'
3. 'ॐ हृत्पुण्डरीकमध्यस्थां प्रातःसूर्यसमप्रभाम्। पाशांकुशधरां सौम्यां वरदाभयहस्तकाम्। त्रिनेत्रां रक्तवसनां भक्तकाम-दुघां भजे।। ॐ भूर्भुवस्वः कौमार्यै नमः। कौमारीमावाहयामि स्थापयामि। भो कौमारि इह आगच्छ इह तिष्ठ।।'
4. 'ॐ कालरात्रिं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम्। सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम्।। ॐ भूर्भुवस्वः वैष्णव्यै नमः। वैष्णवीमावाहयामि स्थापयामि। भो वैष्णवि इह आगच्छ इह तिष्ठ।।'

CC-0. Shri Satyam Sadhanalaxmi Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Mumukshu Jammi Research Academy

5. 'ॐ सत्यञ्च मे श्रद्धा च मे जगच्च मे धनञ्च मे विश्वञ्च मे क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृत ञ्च मे यज्ञेन कल्पन्ताम्।। ॐ भूर्भुवस्वः वाराह्यै नमः। वाराहीमावाहयामि स्थापयामि। भो वाराहि इह आगच्छ इह तिष्ठ।।'

6. 'ॐ सैषा सत्त्वरजस्तमांसि। सैषा प्रजापतीन्द्रमनवः। सैषा ग्रहनक्षत्रज्योतींषि कालकाष्ठाऽऽदिकालरूपिणी। तामहं प्रणौमि नित्यम्।। ॐ भूर्भुवस्वः इन्द्राण्यै नमः। इन्द्राणीमावाहयामि स्थापयामि। भो इन्द्राणि इह आगच्छ इह तिष्ठ।।'

7. 'ॐ योऽहमस्मीति वा सोऽहमस्मीति वा योऽसौ सोऽहमस्मीति वा या भाव्यते सैषा षोडशी श्रीविद्या पंचदशाक्षरी श्रीमहात्रिपुरसुन्दरी बालाऽम्बिकेति बगलेति वा मातंगीति स्वयंवरकल्याणीति भुवनेश्वरीति चामुण्डेति चण्डेति वाराहीति तिरस्करिणीति राजमातंगीति वा शुकश्यामलेति वा लघुश्यामलेति वा अश्वारूढेति वा प्रत्यंगिरा धूमावती सावित्री सरस्वती गायत्री ब्रह्मानन्दकलेति।। ॐ भूर्भुवस्वः चामुण्डायै नमः। चामुण्डामावाहयामि स्थापयामि। भो चामुण्डे इह आगच्छ इह तिष्ठ।।'

अथवा नाममन्त्रों से भी आवाहनादि कर सकते हैं –

1. ॐ भूर्भुवःस्वः ब्राह्यै नमः। ॐ भूर्भुवःस्वः ब्राह्मीमावाहयामि स्थापयामि। ॐ भूर्भुवःस्वः भो ब्राह्मी इहागच्छ इहा तिष्ठ।
2. ॐ भूर्भुवःस्वः माहेश्वर्य्यै नमः । ॐ भूर्भुवःस्वः माहेश्वरीमावाहयामि स्थापयामि।
   ॐ भूर्भुवःस्वः भो माहेश्वरी इहागच्छ इहा तिष्ठ ।
3. ॐ भूर्भुवःस्वः कौमार्य्यै नमः । ॐ भूर्भुवःस्वः कौमारीमावाहयामि स्थापयामि ।
   ॐ भूर्भुवःस्वः भो कौमारी इहागच्छ इहा तिष्ठ ।

4. ॐ भूर्भुवःस्वः वैष्णव्यै नमः । ॐ भूर्भुवःस्वः वैष्णवीमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो वैष्णवी इहागच्छ इह तिष्ठ ।

5. ॐ भूर्भुवःस्वः वाराह्यै नमः। ॐ भूर्भुवःस्वः वाराहीमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो वाराही इहागच्छ इहा तिष्ठ । ॐ

6. ॐ भूर्भुवःस्वः इन्द्राण्यै नमः । ॐ भूर्भुवःस्वः इन्द्राणीमावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो इन्द्राणी इहागच्छ इह तिष्ठ ।

7. ॐ भूर्भुवःस्वः चामुण्डायै नमः । ॐ भूर्भुवःस्वः चामुण्डामावाहयामि स्थापयामि ।
ॐ भूर्भुवःस्वः भो चामुण्डा इहागच्छ इहा तिष्ठ । इत्यावाह्य

ॐ मनोजूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनो त्वरिष्टं यज्ञꣳसमिमं दधातु । विश्वेदेवा स इह मादयन्ता मो 3 प्रतिष्ठ ।।
ॐ अस्यै प्राणा प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन ।। ब्राह्यादि सप्तमातृकाभ्यो नमः।

पंचोपचार अथवा दशोपचार अथवा षोडशोपचारों से पूजन करें –

'ॐ भूर्भुवःस्वः स्थलमातृकादेवताभ्यो नमः सर्वोपचारार्थे गन्धादीन्समर्पयामि।'
अनया पूजया स्थलमातृकादेवता साङ्गा सपरिवारा सायुधा सशक्तिका सवाहना प्रीयन्ताम् न मम ।।

5.27 ॐकारपूजनं श्रीपूजनं च –

'ॐकारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं चैव ॐकाराय नमो नमः।।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

निम्न मन्त्र से पंचोपचार अथवा दशोपचार अथवा षोडशोपचारों से पूजन करें - **'ॐ भूर्भुवःस्वः ॐकारय नमः।'**

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्म ऽइषाण।।' निम्न मन्त्र से पंचोपचार अथवा दशोपचार अथवा षोडशोपचारों से पूजन करें - **'ॐ भूर्भुवःस्वः श्रियै नमः।'**

5.28 त्रिदेवपूजनं।

परमपितामह ब्रह्माजी का ध्यान करे -

'ॐ सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपद्ये।।

ॐ भूर्भुवस्वः ब्रह्मणे नमः। ब्रह्माणमावाहयामि स्थापयामि। भो ब्रह्म इह आगच्छ इह तिष्ठ।।'

भगवान् विष्णु का ध्यान करे -

'शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं, विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं, वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।
ॐ भूर्भुवःस्वः विष्णवे नमः। ॐ भूर्भुवःस्वः विष्णुमावाहयामि स्थापयामि।
ॐ भूर्भुवःस्वः भो विष्णु इहागच्छेह तिष्ठ।'

भगवान् शंकर का ध्यान करे -

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

'वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं। वन्दे पत्रगभूषणं मृगधरं वन्दे पशूनां पतिं।।
वन्दे सूर्यशशांकवह्निनयनं वन्दे मुकुन्दप्रियं। वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।।
ॐ भूर्भुवःस्वः शिवाय नमः। ॐ भूर्भुवःस्वः शिवमावाहयामि स्थापयामि।
ॐ भूर्भुवःस्वः भो शिव इहागच्छेह तिष्ठ।'

5.29 अथ सांकल्पिकनान्दीमुखश्राद्धम् (आभ्युदयिक श्राद्धम्) - **तत्र प्रमाणम्** -

कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः। शुभकर्मणि बालानां चूडाकर्मादिके तथा ।।
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने । नान्दीमुखान् पितृनादौ तर्पयेत्प्रयतो गृही ।।

विधिः - 'आभ्युदयिके प्रदक्षिणमुपचारः पूर्वाह्णे, पित्र्यमन्त्रवर्जं जपः, ऋजवो दर्भाः, यवैस्तिलार्थाः, संपन्नमिति इतरे ब्रूयुः । नान्दीमुखान् पितृन् आवाहयिष्ये इति पृच्छति आवाहयेत्यनुज्ञातो नान्दीमुखाः पितरः प्रीयन्तामिति, अक्षय्यस्थाने नान्दी मुखान् पितृन् वाचयिष्ये इति पृच्छति वाच्यतामित्यनुज्ञातो नान्दीमुखाः पितरः पितामहाः प्रपितामहाः, मातामहाः प्रमातामहाः वृद्धप्रमातामहाश्च प्रीयन्ताम् इति, न स्वधां प्रयुञ्जीत् । कर्तव्यं चाभ्युदयिकं श्राद्धमभ्युदयार्थिना । सव्येन चोपवीतेन ऋजु दर्भैश्च धीमता । (हेमाद्रौ) अत्र सत्यवसुसंज्ञकाः विश्वेदेवाः । षड्दैवतं श्राद्धम् । पूर्वाह्ने इत्यनेन अपराह्नकालस्य निषेधः । उदीरितामवर इत्यादि पितृमन्त्राणां जपस्य निषेधः । तिलोऽसीति पदस्थाने यवोऽसि इत्यूहः कार्यः। स्वधया इति पद स्थाने पुष्टि शब्दं वदेत् ।'

अर्थात् उत्सव, आनन्द, यज्ञ, पुत्र/पुत्री विवाह, गृह प्रवेश, शुभ कर्म, सीमन्तोन्नयन, चूडादि कर्म, मूर्ति प्रतिष्ठा आदि कार्यों में शास्त्रोक्त विधान से नान्दीमुख श्राद्ध करना चाहिए । प्रातः काल प्रातः कृत्य, स्नानादि से निवृत्त होकर विशुद्ध भूमि में आकर शुद्ध आसन पर बैठकर

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

स्वस्तिवाचन एवं गणपति पूजन करने के पश्चात् पुण्याहवाचन से पूर्व देवविधि के अनुसार आभ्युदयिक श्राद्ध को करे । अभ्युदय (वृद्धि) प्राप्ति के लिए जो कार्य किया जाता है उसे आभ्युदयिक श्राद्ध कहते हैं, इसे ही नान्दीमुख श्राद्ध कहा जाता है। इसमें नामभेद की बात नहीं है । यह श्राद्ध प्रातः काल में ही करना चाहिए । अपराह्नकाल का निषेध है । इस श्राद्ध में तिलों के स्थान पर यव का प्रयोग होता है । मन्त्रों के अतिरिक्त स्वाहा या स्वधा शब्द का प्रयोग नहीं होता है । इसमें यजमान पूर्वाभिमुख बैठकर ही समस्त कार्य करता है। इसमें कुशा भी सीधे ढंग से प्रयोग में लाई जाती है । इत्यादि....। आसन पर बैठकर

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुण्डरीकाक्षं स वाह्याभ्यन्तरः शुचिः ।।
पुण्डरीकाक्षः पुनातु। पुण्डरीकाक्षः पुनातु। पुण्डरीकाक्षः पुनातु।

जल से प्रोक्षण कर आचमन करके स्वस्ति वाचन करे ।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ।।

ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे । पयोधाः पयःस्वती प्रदिशः सन्तु मह्यम् ।

ॐ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि । विष्णोः ध्रुवोसि वैष्णवमसि विष्णवे त्वा ।

ॐ अग्निर्देवता वातो देवता सूर्योदेवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता विश्वेदेवता देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ।

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरौषधयः शान्तिः वनस्पतयः शान्तिर्विश्वेदेवाः शान्ति र्ब्रह्म शान्तिः सर्व ँशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि सुशान्तिर्भवति ।

ॐ विश्वेदेवा सः इह मादयन्ता मो प्रतिष्ठ एष वै प्रतिष्ठ नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ विश्वानि देव सवित र्दुरितानि परासुव यद्भद्रं तन्न आसुव ।

ॐ एतन्ते देव सवितर्यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव ।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

॥अथायुष्य मन्त्रः॥

यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविषु। ददुस्तेनायुषा युक्ता जीवेम शरदः शतम्॥

दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः। अनन्तेनायुशा तेन जीवेम शरदः शतम्॥

सत्यानि पंचभूतानि विनाशरहितानि च। अविनाश्यायुशा तद्वज्जीवेम शरदः शतम्॥

ॐ आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम् । इदꣳहिरण्यं वर्चस्वज्जैत्राया विशतादुमाम् ॥ 1

ॐ न तद्रक्षाꣳसि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳह्येतत् । यो विभर्ति दाक्षायणꣳहिरण्यं स देवेषु कृणुते दीर्घमायुः। स मनुष्येषु कृणुते दीर्घमायुः॥2॥

ॐ यदावध्नन्दाक्षायणा हिरण्यꣳशतानीकाय सुमनस्यमानाः। तन्म आबध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥ 3 ॥

ॐ यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथाऽन्ये । विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥ 4 ॥

अभीप्सितार्थ सिद्ध्यर्थं पूजितो यः सुरैरपि । सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ इति गणेशं नमस्कृत्य,

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ इति विष्णुं च प्रणम्य,

सत्यानुष्ठानसम्पन्नाः सर्वदा यज्ञबुद्धयः । पितृमातृपराश्चैव सन्त्वस्मत् कुलजाः नराः ॥ इति कुलपुरुषान्प्रणम्य,

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

विशेषपूजनम् -

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च । प्रयच्छन्तु तथा राज्यं नृणाम्प्रीताः पितामहाः ।।
आयुः पुत्रान् यशः स्वर्गं कीर्त्तिं पुष्टिं बलं श्रियम् । पशून् सुखं धनं धान्यं प्राप्नुया पितृपूजनात् ।।
देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ।।

वस्त्र, यज्ञोपवीत, चन्दन, अक्षत, पुष्प, धूप, दीप, नैवेद्य, पूगीफल, ताम्बूल और दक्षिणा रखकर आचमन और प्राणायाम करके संकल्प करें - **'ॐ विष्णुर्विष्णुर्विष्णुः पूर्वोक्त एवं गुणविशेषणविशिष्टायां शुभतिथौ देवब्राह्मणानां च सन्निधौ अद्य दुर्गापूजनांगत्वेन सांकल्पिकविधिना ब्राह्मणयुग्मभोजनपर्याप्तमन्ननिष्क्रयीभूतं यथाशक्तिहिरण्येन नान्दीश्राद्धं करिष्ये'।**

पाद्यादि दान करे -

'सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।1।
अमुकगोत्रा मातृपितामहीप्रपितामह्यः नांदीमुख्यः ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।2।
अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखा ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः।3।
(द्वितीयगोत्राः -) **मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः पाद्यं पादप्रक्षालनं स्वाहा संपद्यतां वृद्धिः'।4।**

आसन दान करें -

'सत्यवसुसंज्ञकानां विश्वेषां देवानां नान्दीमुखानां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः।1।

अमुकगोत्राणां मातृपितामहीप्रपितामहीनां नान्दीमुखीनां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः।2।

अमुकगोत्राणां पितृपितामहप्रपितामहानां नान्दीमुखानां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः।3।

(द्वितीयगोत्राणां -)

मातामहप्रमातामहवृद्धप्रमातामहनां सपत्नीकानां नान्दीमुखानां ॐ भूर्भुवःस्वः इदमासनं सुखासनं स्वाहा नमः संपद्यतां वृद्धिः नान्दीश्राद्धे क्षणौ क्रियेताम् ॐ तथा प्राप्नुतां भवन्तौ प्राप्नुवावः'।4।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

गन्धादि दान करें -

'सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।1।
अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।2।
अमुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः।3।
(द्वितीयगोत्रेभ्यो -)
मातामहप्रमातामहवृद्धप्रमातामहेभ्यो सपत्नीकेभ्यो नान्दीमुखेभ्यः इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः'।4।

भोजननिष्क्रयद्रव्य दान करें -

'सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः इदं ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं

दत्तममृतरूपेण। स्वाहा संपद्यतां वृद्धिः।1।

अमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यः इदं ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः।2।

अमुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः इदं ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः।3।

(द्वितीयगोत्रेभ्यो -)

मातामहप्रमातामहवृद्धप्रमातामहेभ्यो सपत्नीकेभ्यो नान्दीमुखेभ्यः इदं ब्राह्मणयुग्मभोजनपर्याप्तमन्नं तन्निष्क्रयीभूतं किंचिद्धिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः'।4।

सक्षीर जल दान करें -

'सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्।1।

अमुकगोत्रा मातृपितामहीप्रपितामह्यः नांदीमुख्यः ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्।2।

अमुकगोत्राः पितृपितामहप्रपितामहाः नान्दीमुखा ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्।3।

(द्वितीयगोत्राः -)

मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः ॐ भूर्भुवःस्वः इदं वः सक्षीरोदकं प्रीयन्ताम्'।4।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

जलाक्षतपुष्प दान करें - '**चतुर्थस्थानेषु शिवा आपः सन्तु** - इति जलम्। **अक्षतं चारिष्टमस्तु** - इत्यक्षतान्।
सौमनस्यमस्तु - इति पुष्पम्। '**ॐ अघोराः पितरः सन्तु** - इति पूर्वाग्रां जलधारां दद्यात्।

आशीर्वाद ग्रहण करें -

यजमान कहे - '**गोत्रं नो वर्धताम्**',	द्विज कहे - '**वर्धताम् वो गोत्रम्**'।
यजमान कहे (सिर ढ़ककर) - '**दातारो नोऽअभिवर्धताम्**',	द्विज कहे - '**अभिवर्धताम् वो दातारः**'।
यजमान कहे - '**वेदाश्च नोऽअभिवर्धन्ताम्**',	द्विज कहे - '**अभिवर्धन्ताम् वो वेदाः**'।
यजमान कहे - '**संततिर्नो वर्धताम्**',	द्विज कहे - '**वर्धताम् वः सन्ततिः**'।
यजमान कहे - '**श्रद्धा च नो मा व्यगमत्**',	द्विज कहे - '**मा व्यगमत् वः श्रद्धा**'।
यजमान कहे - '**बहु देयं च नोऽअस्तु**',	द्विज कहे - '**अस्तु वो देयम्**'।
यजमान कहे - '**अन्नं च नो बहु भवेत्**',	द्विज कहे - '**भवतु वो बह्वन्नम्**'।
यजमान कहे - '**अतिथींश्च लभामहे**',	द्विज कहे - '**लभन्ताम् वोऽअतिथयः**'।
यजमान कहे - '**याचितारश्च नः सन्तु**',	द्विज कहे - '**सन्तु वो याचितारः**'।
यजमान कहे - '**एषा आशिषः सत्याः सन्तु**',	द्विज कहे - '**सन्त्वेताः सत्याशिषः**'।

दक्षिणा दान दें -

'**सत्यवसुसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नान्दीमुखेभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयव मूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः।1।**

CC-0. Shri Satyam Sanatan Shruti Vishvesh. Digitized by Muthulakshmi Research Academy

अमुकगोत्राभ्या मातृपितामहीप्रपितामहीभ्यो नान्दीमुखीभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयव मूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः।2।

अमुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो नान्दीमुखेभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयव मूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः।3। (द्वितीयगोत्रेभ्यो -)

मातामहप्रमातामहवृद्धप्रमातामहेभ्यो सपत्नीकेभ्यो नान्दीमुखेभ्यः कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयव मूलादिभिर्निष्क्रयीभूतां दक्षिणां दातुमहमुत्सृजे संपद्यतां वृद्धिः'।4।

'नान्दीश्राद्धं संपन्नं सुसंपन्नमस्तु' - यह कह कर अगले मन्त्र से विसर्जन करें -

ॐ वाजे वाजेवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबतमादयध्वं तृप्तायात पथिभिर्देवयानैः'।1।

इस मन्त्र से अनुव्रजन करें -

आमा वाजस्य प्रसवोजगम्यादेमे द्यावापृथिवी विश्वरूपे। आमागन्तां पितरा मातरा चामा सोमोऽअमृतत्वेन गम्यात्'।2।

यजमान कहे - **'अस्मिन्नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् नान्दीमुखप्रसादाच्च सर्वः परिपूर्णोऽअस्तु'**, द्विज तीन बार कहे - **'अस्तु परिपूर्णः, अस्तु परिपूर्णः, अस्तु परिपूर्णः'**।

5.30-1 <u>अथ आचार्यवरणं</u> :- (यह केवल यज्ञ के दिन करें)

हाथ में गन्धाक्षतपुष्पताम्बूलमुद्रा और वस्त्र लिये हुये सर्व प्रथम आचार्यत्व हेतु एक ब्राह्मण से निवेदन करें -

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

'अस्मिन्दुर्गापूजनादिहोमपर्यन्तकर्मकर्तुं.....गोत्रवन्तं.....शर्माणं ब्राह्मणं एभिर्गन्धाक्षतपुष्पताम्बूलमुद्रावासोभिः आचार्यत्वेन त्वामहं वृणे।' आचार्य कहें –

'ॐ वृतोऽस्मि। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते'।

उनके हाथों में गन्धादि देकर पुनः प्रार्थना करें –

'ॐ बृहस्पते इत्यस्य मन्त्रस्य गृत्समद ऋषिः, त्रिष्टुप्छन्दः, बृहस्पतिर्देवता आचार्यवरणे विनियोगः।

ॐ बृहस्पतेऽअतियदर्योऽर्हाद्द्युमद्विभाति क्रतुमज्जनेषु। यद्दीदयच्छवस ऋतप्रजाततदस्मासु द्रविणं देहि चित्रम्।।

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः। तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत।।'

चन्दनाक्षतपुष्पादि से आचार्यजी की पूजा करें। अब यज्ञ केलिये ब्रह्मा का वरण करें।

5.30-2 <u>अथ ब्रह्मा वरणं</u> :-

हाथ में पुनः गन्धाक्षतपुष्पताम्बूलमुद्रा और वस्त्र लिये हुये ब्रह्मा पद केलिये एक ब्राह्मण से निवेदन करें –

'अस्मिन्दुर्गानूजनादिहोमपर्यन्तकर्मकर्तुं....गोत्रवन्तं....शर्माणं ब्राह्मणं एभिर्गन्धाक्षतपुष्पताम्बूलमुद्रावासोभिः ब्रह्मत्वेन त्वामहं वृणे।' ब्रह्मा कहें –

'ॐ वृतोऽस्मि। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते'।

उनके हाथों में गन्धादि देकर पुनः प्रार्थना करें –

'ॐ ब्रह्मणा ते इत्यस्य मन्त्रस्य विश्वामित्रो ऋषिः, त्रिष्टुप्छन्दः, ब्रह्मा देवता, ब्रह्मवरणे विनियोगः।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

ॐ ब्रह्म ... ... ब्रह्मयुजा युनज्मि हरी सखिया सधमाद आशु। स्थिरं रथं सुखमिन्द्राधितिष्ठन् प्रजानन् विद्वानुपयाहि - सोमम्।। यथा चतुर्मुखो ब्रह्मा स्वर्गे लोके पितामहः। तथा त्वं मम यज्ञेऽस्मिन्ब्रह्मा द्विजपते भव।।'

चन्दनाक्षतपुष्पादि से ब्रह्माजी की पूजा करें। अब यज्ञ केलिये अन्य आवश्यक ऋत्विजों का वरण करें।

9.30-3 अथ ऋत्विग्वरणं :-

एकाग्नि विधि से केवल आचार्य व ब्रह्मा के वरण से कर्म को कर सकते हैं। यदि सामर्थ्य है और आवश्यकता भी हो तो सामर्थ्य व आवश्यकता के अनुसार (23,15 अथवा 11) जितने ब्राह्मणों को वरण करना है उन्हें उत्तराभिमुख बिठाकर उनके समक्ष हाथ में गन्ध अक्षतपुष्पताम्बूलमुद्रा और वस्त्र लिये हुये उनसे निवेदन करें -

'अस्मिन्दुर्गापूजनादिहोमपर्यन्तकर्मकर्तुं.....गोत्रवन्तं.....शर्माणं ब्राह्मणं एभिर्गन्धाक्षतपुष्पताम्बूलमुद्रावासोभिः ऋत्विक्त्वेन त्वामहं वृणे।' वे सब कहें -

'ॐ वृताः स्म। ॐ व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते'।

अब सबके हाथों में दक्षिणा देकर प्रार्थना करें -

'भगवन् सर्वधर्मा सर्वधर्मपरायण। विततते मम यज्ञेऽस्मिन्नृत्विक्त्वं मखे भव।।'

चन्दनाक्षतपुष्पादि से ऋत्विजों की पूजा कर पुनः प्रार्थना करे -

'अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। ग्रहध्यानरताः नित्यं प्रसन्नमनसःसदा।।
अदुष्टभाषणाः सन्तु मा सन्तु परनिन्दकाः। ममाऽपि नियमा ह्येते भवन्तु भवतामपि।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

ऋत्विज्यथापूर्वं शक्रादीनां मखे भवेत्। यूयं तथा मे भवत ऋत्विजोऽर्हथ सत्तमाः।।
अस्मिन् कर्मणि ये विप्राः वृता गुरुमुखादयः। सावधानाः प्रकुर्वन्तु स्वं स्वं कर्म यथोदितम्।।
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया। सुप्रसन्नैश्च कर्तव्यं कर्म मे विधिपूर्वकम्।।
यथाविहितं कर्म कुरु (बहवश्चेत् - कुरुत)। विप्रः - **यथाज्ञानं करवाणि** (करवाम)।।'

5.31 अथ मधुपर्कपूजाप्रयोगः-

यजुर्वेदीय गृह्यसूत्र के अनुसार मधुपर्क से वरण किये गये समस्त ऋत्विजों की पूजा करने का क्रम बताया जा रहा है। (यदि वरण किये गये ब्राह्मण अलग-अलग वेदी हो तो उनकी मधुपर्क पूजा उस-उस वेद के गृह्यसूत्र के अनुसार ही करें)। समस्त ब्राह्मणों को एक पंक्ति में पूर्वाभिमुख बिठायें और स्वयं यजमान उत्तराभिमुख बैठें। यजमान आचमन कर हाथ जोड़कर प्रत्येक ब्राह्मण से प्रार्थना करें -

1. '**ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्**', द्विज कहे - '**ॐ अर्चय**'।

2. आचार्य जितने ब्राह्मण वरण किये गये हैं उतने विष्टर ग्रहण कर कहे - '**ॐ विष्टरो विष्टरो विष्टरः**' और यजमान को दे, यजमान प्रत्येक से कहे - '**ॐ विष्टरः प्रतिगृह्यताम्**' और उन्हें दे, द्विज यजमान से ग्रहण कर कहे - '**ॐ विष्टरं प्रतिगृह्णामि**'। सभी के द्वारा ग्रहण किये जाने पर सभी द्विज मिलकर कहें और अपने-अपने आसन के नीचे विष्टर को उत्तराग्र रखे - '**ॐ वर्ष्मोऽस्मि समानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाभिदासति।**'

3. आचार्य पाद्यपात्र ग्रहण कर कहे - '**ॐ पाद्यं पाद्यं पाद्यं**' और यजमान को दे, यजमान प्रत्येक से कहे - '**ॐ पाद्यं प्रतिगृह्यताम्**', द्विज कहे - '**ॐ पाद्यं प्रतिगृह्णामि**'। अब यजमान प्रत्येक द्विज के पहले दाहिने पैर को फिर बायें पैर को क्रमशः इस मन्त्र से धोवे -

CC-0. Shri Satyam Sadhanalaya Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

'ॐ विराजो दोहात्त्वराजो दोहमशीय मयि पाद्यायै विराजो दोहः।' पुनः आचार्य पूर्ववत् विष्टर ग्रहण कर कहे - **'ॐ विष्टरो विष्टरो विष्टरः'** और यजमान को दे, यजमान प्रत्येक से कहे - **'ॐ विष्टरः प्रतिगृह्यताम्'** और उन्हें दे, द्विज यजमान से ग्रहण कर कहे - **'ॐ विष्टरं प्रतिगृह्णामि'**। सभी के द्वारा ग्रहण किये जाने पर सभी द्विज मिलकर कहें और अपने-अपने पैर के नीचे विष्टर को उत्तराग्र रखे - **'ॐ वर्ष्मोऽस्मि समानामुद्यतामिव सूर्यः। इमं तमभितिष्ठामि यो मा कश्चाभिदासति।'**

4. आचार्य अर्घ्यपात्र ग्रहण कर कहे - **'ॐ अर्घोऽर्घोऽर्घः'**, और यजमान को दे, यजमान प्रत्येक से कहे - **'ॐ अर्घः प्रतिगृह्यताम्'**, द्विज कहे - **'ॐ अर्घ प्रतिगृह्णामि'**। यजमान के हाथ से प्रत्येक द्विज अर्घ्यपात्र को इस मंत्र से ग्रहण करें - **'ॐ आपस्थ युष्माभिः सर्वान्कामानवाप्नुवानि।'** सभी के द्वारा ग्रहण किये जाने पर सभी द्विज मिलकर कहें और जल को भूमि पर गिरायें - **'ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टास्माकं वीरामापरासेचिमत्पयः।'**

5. आचार्य आचमनीयपात्र ग्रहण कर कहे - **'ॐ अचमनीयमाचमनीयमाचमनीयम्'**, और यजमान को दे, यजमान प्रत्येक से कहे - **'ॐ आचमनीयं प्रतिगृह्यताम्'**, द्विज कहे - **'ॐ आचमनीयं प्रतिगृह्णामि'**। यजमान के हाथ से प्रत्येक द्विज आचमनीयपात्र को ग्रहण कर इस मंत्र से एक बार आचमन करे - **'ॐ आमागन्यशसा सꣳसृज वर्चसा तम्मा कुरु प्रियम्प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्।'** फिर स्मार्त आचमन करें।

6. आचार्य ढके हुये मधुपर्कपात्र को ग्रहण कर कहे - **'ॐ मधुपर्क मधुपर्क मधुपर्कम्'**, और यजमान को दे, यजमान प्रत्येक से कहे **'ॐ मधुपर्क प्रतिगृह्यताम्'**, द्विज कहे - **'ॐ मधुपर्क प्रतिगृह्णामि'**। यजमान के हाथ में स्थित मधुपर्कपात्र को खोलकर इस मंत्र से देखें - **'ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे।'** और इस मंत्र से यजमान के हाथ से ले - **'ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनो**

CC-0. Shri Shyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

बाहुभ्याम्पूष्णो हस्ताभ्यां प्रतिगृह्णामि।' अपने बायें हाथ में रखकर दाहिने हाथ की अनामिका और अंगुष्ठ से प्रदक्षिणा के क्रम से एक बार आलोडन कर थोड़ा जमीन पर गिरायें फिर दोबारा मन्त्र का पाठकर पुनः थोड़ा जमीन पर गिराये - **'ॐ नमः स्यावास्यायान्यशनेयत्त आविद्धं तत्ते निष्कृन्तामि।'** तत्पश्चात् इस मंत्र से तीन बार अनामिका और अंगुष्ठ से प्राशन करके शेष को बांटें - **'ॐ यन्मधुनो मध्व्यं परमꣳरूपमन्नाद्यं तेनाहं मधुनो मध्व्येन परमेण रूपेणान्नाद्येन परमो मध्व्योऽन्नादोऽसानि।'** तदनन्तर स्मार्तविधि से आचमन कर निम्न विधि से अपने अंगों को कराग्र से स्पर्श करें -

ॐ वाङ्मे आस्येऽअस्तु (मुख)', '**ॐ नसो मे प्राणोऽअस्तु** (दोनों नासिका छिद्र)', '**ॐ अक्ष्णोर्मेचक्षुरस्तु** (दोनों आंख)', '**ॐ कर्णयोर्मे श्रोत्रमस्तु** (दोनों कान)', '**ॐ बाह्वोर्मे बलमस्तु** (दोनो बाहु)', '**ॐ ऊर्वोर्मे ओजोऽअस्तु** (दोनों जांघ)', '**ॐ अरिष्टानि मेऽअंगानि तनूस्तन्वा मे सह सन्तु** (पूरे शरीर को दोनों हाथों से स्पर्श करे)। हस्तप्रक्षालन कर आचमन करे।

7. आचार्य कहे - '**ॐ गौर्गौर्गौः**', यजमान कहे - '**ॐ गौः प्रतिगृह्यताम्**', द्विज कहे - '**ॐ गौः प्रतिगृह्णामि,**

ॐ माता रुद्राणां दुहिता वसूनांꣳस्वसाऽआदित्यानाममृतस्य नाभिः। प्रणुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ठ।। मम अमुष्य यजमानस्य चोभयोः पाप्मा हतः ॐ'। पुनः जोर से कहे - '**ॐ उत्सृजत तृणान्यत्तु।**'

अथ प्रार्थना :-

अब यजमान सभी ब्राह्मणों के समक्ष हाथ जोड़कर प्रार्थना करे -

''ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः। वेदानां चैव दातारस्त्रातारः सर्वदेहिनाम्।1।
जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः। देवानां च पितृणां च तृप्त्यर्थं याजकाः स्मृताः।2।

CC-0.Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

यषा देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्। रक्षन्तु सततं तेषां जपयज्ञं व्यवस्थिताः।3।
ब्राह्मणा जंगमं तीर्थं त्रिषु लोकेषु विश्रुतम्। येषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः।4।
पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः। सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः।5।
श्रोत्रियाः सत्यवाचश्च देवध्यानरताः सदा। यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः।6।
अंगीकुर्वन्तु कर्मैतत्कल्पद्रुमसमाशिषः। यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः।7।
यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः। अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।8।
देवध्यानरता नित्यं प्रसन्नमनसः सदा। अदुष्टभाषणा नित्यं मा सन्तु परनिन्दकाः।9।
ममापि नियमा ह्येते भवन्तु भवतामपि।10।'

(आचार्यजी से विशेष प्रार्थना -)

'संसारभयभीतेन अयं यज्ञः सुभक्तितः। प्रारब्धस्त्वत्प्रसादेन निर्विघ्नं मे भवत्विति।11।
मन्त्रमूर्तिर्भवान्नाथ संसारोच्छेदकारक। सांगं कर्म यथा मे स्यात्तथा कुरु हि भूसुर।12।
अस्य यागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया। सुप्रसादेन कर्तव्यं शान्तिकं विधिपूर्वकम्।13।

।। अथ मधुपर्कांग गोदानम्।।

ॐ कृतस्य मधुपर्कादिपूजनकर्मणः सांगतासिद्धयर्थं गोनिष्क्रयभूतं द्रव्यं, रजतं चन्द्रदैवतं .....गोत्राय ....शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

आचार्यं पृथक्त्प्रार्थयेत् -

मन्त्रमूर्तिभवान्नाथ संसारोच्छेदकारक। सांगं कर्म यथा में स्यात्तथा कुरु हि भूसुर ।। 11 ।।
संसारभयभीतेन अयं यज्ञः सुभक्तितः। प्रारब्धः त्वत्प्रसादेन निर्विघ्नं कुरु सुव्रत ।। 12 ।।

6. अथ मण्डपान्तर्वर्तिकर्म

6.1 अथ मण्डप प्रवेशः ।।

पूजास्थानस्य चतुर्दिक्षु अश्वत्थोदुम्बरप्लक्षाणामन्यतमस्य वितस्तिमात्रान्दशकीलान् " **ॐ नमः सुदर्शनाय अस्त्राय फट्** " इति मंत्रेणाष्टोत्तरशताभिमन्त्रितान्

'ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यन्तरिक्षगाः। विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु।।1।।
मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः। अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे।।2।।'

इति मन्त्रद्वयेन निखनेत्। "**ॐ भूर्भुवःस्वः सुदर्शनायास्त्राय फट्**" इति मन्त्रेण प्रत्येकमस्त्रं संपूज्य तत्रैव पूर्वादिक्रमेण पंचोपचारैः संपूजयेत्। इतना कार्य करने के पश्चात् यजमान मण्डप में प्रवेश करे । ततः सम्भारान् गृहीत्वा सुवासिनी ब्राह्मणान् अग्रतः कृत्वा सतूर्यघोषः सपरिकरः पञ्चपूर्णकुम्भो गणपति वरुण मातृकापीठं वसोर्द्धारापीठं च ब्राह्मणानां हस्ते, यजमानः स्वहस्ते गणपतिं गृहीत्वा

'ॐ भद्रंकर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षिभिर्यजत्राः । स्थिरैरंगैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः ।।'

इति मन्त्रेण महामण्डपं प्रदक्षिणीकृत्य मण्डपस्य पश्चिमद्वारमागत्य पाणिभ्यां चार्घपात्रमादाय शान्ति अध्यायं पठेत् ।

'ॐ ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये सामप्राणम्प्रपद्ये चक्षुःश्रोत्रम्प्रपद्ये। वागोजः सहौजो मयि प्राणापानौ।।1।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

यन्म ।छिद्र चक्षुषो हृदयस्य मनसो वाति तृणम्बृहस्पतिर्मे तद्दधातु। शन्नो भवतु भुवनस्य यस्पतिः।।2।।
ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।3।।
कया नश्चित्रऽआभुवदूती सदावृधः सखा। कया शचिष्ठयावृता।।4।।
कस्त्वा सत्यो मदानाम्मꣳहिष्ठोमत्सदन्धसः। दृढा चिदारुजेवसु।।5।।
अभीषुणः सखीनामविता जरितॄणाम्। शतम्भवास्यूतिभिः।।6।।
कया त्वन्नऽऊत्याभिप्रमन्दसे वृषन्। कया स्तोतृभ्यऽआभर।।7।।
इन्द्रो विश्वस्य राजति। शन्नोऽअस्तु द्विपदे शं चतुष्पदे।।8।।
शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा। शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।।9।।
शन्नो वातः पवताꣳशन्नस्तपतु सूर्यः। शन्नः कनिक्रन्दद्देवः पर्जन्योऽअभिवर्षतु।।10।।
अहानि शम्भवन्तु नः शꣳरात्रीः प्रतिधीयताम्। शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रा -
वरुणारातहव्या। शन्नऽइन्द्रापूषणावाजसा तौ शमिन्द्रासोमासुविताय शंयोः।।11।।
शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंयोरभिस्रवन्तु नः।।12।।
स्योना पृथिवि नो भवानृक्षरानिवेशनी। यच्छानः शर्म सप्रथाः।।13।।
आपो हिष्ठामयो भुवस्तानऽऊर्जे दधातन। महेरणाय चक्षसे।।14।।
यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।।15।।
तस्माऽअरंगमामवो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः:।।16।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि।।17।।
दृतेदृꣳहमा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहं चक्षुषा
सर्वाणि भूतानि समीक्षे। मित्रस्य चक्षुषा समीक्षामहे।।18।।
दृतेदृꣳहमा। ज्योक्तेसन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम्।।19।।
नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे। अन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳशिवो भव।।20।।
नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे।।21।।
यतो यतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः।।22।।
सुमित्रियानऽआपऽओशधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽअस्मान्द्वेष्टि यंच वयं द्विष्मः।।23।।
तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳशृणुयाम शरदः शतम्प्रब्रवाम
शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात्।।24।। ॐ शान्तिः शान्तिः शान्तिः।।'

ततः पृथिवीं ध्यात्वा-

'चतुर्भुजां पृथ्वीं शुक्लां कूर्मपृष्ठोपरि स्थिताम्। शंखचक्रशूलकरां सुप्रसन्नां विहसिताम्।।
सवत्सां गोरूपधरां पद्मकरां वसुन्धराम्।।' अथ आवाहनम् -
आगच्छ देवि कल्याणि वसुधे लोकधारिणि। पृथ्वी त्वं ब्रह्मदत्तासि काश्यपेनाऽभिवन्दिता।।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

अथ पुष्पादिना पूजयेत् -

ॐ स्योना पृथिवि नो भवानृक्षरानिवेशनी । यच्छानः शर्म सप्रथाः ।

इति मन्त्रेण पुष्पादिना संपूज्य अष्टार्घ्यं दद्यात् ।

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंय्योरभिस्त्रवन्तु नः ।

इति मन्त्रेण अर्घ्यं दत्वा प्रार्थयेत् -

'उधृतासि वराहेण विष्णुना शतबाहुना । दंष्ट्राग्रे लीलया देवी यज्ञार्थे त्वां वृणोम्यहम् ।।
ब्रह्मणा निर्मिते देवि विष्णुना शंकरेण च । पार्वत्या चैव गायत्र्या स्कन्देन श्रवणेन च ।।
यमेन पूजिता देवि धर्मवृद्धिजिगीषया । सौभाग्यं पुत्रांश्च दत्ते धनं रूपं च पूजिता ।।' इति प्रार्थना ।।

ततो मण्डप पश्चिमद्वारेण प्रथमं दक्षिणपादं दत्त्वा प्रविशेत ।।

6.2 भूतोत्सादनम्

करकलित कपालः कुण्डली दण्डपाणिस्तरुणतिमिरनीलो व्याल यज्ञोपवीती ।
क्रतुसमयसपर्या विघ्नविच्छेद हेतुर्जयति वटुकनाथः सिद्धिदः साधकानाम् ।।

अब रक्षोघ्न सूक्त से भूतोत्सादन करें - (ततः आचार्यो वामहस्ते गौरसर्षपांल्लाजामिश्रितान् गृहीत्वा दिग्रक्षणं कुर्यात् तत्र मन्त्राः)

ॐ अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्नमतामदऽआदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामदऽआपश्च वरुणश्च सन्नते ते मे सन्नमतामदः।

सप्तसꣳसदोऽअष्टमीभूतसाधनी। सकामाँ2ऽअद्वनस्वकुरुसंज्ञानमस्तुमेमुना ।।

ॐ यथेमां वाचङ्कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्याꣳशूद्राय चार्य्याय च स्वाय
चारणाय च। प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयम्मे कामः समृद्ध्यतामुपमादो नमतु ।।

ॐ बृहस्प्पतेऽअति यदर्योऽअर्हाद् द्युमद्विभाति क्रतुमज्जनेषु । यदियच्छवसऽऋत प्रजात तदस्म्मासु
द्रविणन्धेहि चित्रम् । उपयाम गृहीतोसि बृहस्पतये त्वैषते योनिर्बृहस्पतये त्वा ।।

ॐ रक्षोहणं वलगहनं वैष्णवीमिदमहन्तं वलगमुत्किरामि यम्मे निष्टयो यममात्त्यो निचखानेदमहन्तं
वलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं वलगमुत्किरामि यम्मे
सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं वलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्त्याङ्करोमि ।।

ॐ रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवान्त्रक्षोहणो वो वलगहनो वनयामि वैष्णवान्त्रक्षोहणो वो
वलगहनोऽवस्तृणामि वैष्णवान्त्रक्षोहणो वां वलगहनाऽउपदधामि वैष्ण्वी रक्षोहणौ वां वलगहनौ पर्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ ।।

ॐ रक्षसाम्भागोसि निरस्तꣳरक्षऽइदमहꣳरक्षोभि तिष्ठामीदमहकारक्षोवबाधऽ इदमहꣳरक्षोधमन्तमो नयामि।
घृतेन द्यावापृथिवी प्रोर्णुवाथां वायो वेस्तोकानामग्नि राज्यस्य वेतु स्वाहा स्वाहाकृतेऽऊर्द्धनभसमारुतङ्गच्छतम् ।।

ॐ अग्ने नय सुपथा रायेऽ अस्मान्विश्श्वानि देव वयुनानि विद्वान् ।
युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्ति विधेम ।।

ॐ रक्षोहा विश्श्वचर्षणिरभियोनिमयोहते । द्रोणेसधस्थमासदत् ।।

अपसर्पन्तु ते भूता ये भूता भूमि संस्थिताः । ये भूताः विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ।।
यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु ।।
भूतप्रेतपिशाचाद्याः अपक्रामन्तु राक्षसाः । स्थानादस्माद्व्रजन्त्वन्यत् स्वीकरोमि भुवं त्विमाम् ।।
भूतानि राक्षसा वापि अत्र तिष्ठन्ति केचन । ते सर्वेऽप्यपगच्छन्तु शान्तिकं तु करोम्यहम् ।।

एतैः मन्त्रैः ईशानादि सर्वदिक्षु विदिक्षु ऊर्ध्वाधः सर्षपान् विकीर्य

'देवा आयान्तु यातुधाना अपयान्तु, देवीयाग देवयजनं रक्षस्व ।।' इति रक्षां कृत्वा

6.3 अथ पंचगव्यकरणम् प्रोक्षणं च

1. गोमूत्रम् - **ॐ भूर्भुवःस्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।**
2. गोमयम् - **ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।**
3. क्षीरम् - **ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ।।**
4. दधि - **ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रण आयूꣳषि तारिषत् ।।**
5. आज्यम् - **ॐ तेजोसि शुक्रमस्यमृतमसि धामनामसि प्रियन्देवानामनाधृष्टं देवयजनमसि ।।**
6. कुशोदकम् - **ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।।**

इति प्रणवेनालोड्य वारुणैः मन्त्रैः कर्मभूमिं प्रोक्षयेत् ।।

ॐ आपोहिष्ठा मयोभुवस्तान ऊर्जे दधातन । महरेणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते ह नः।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

उशतीरिव मातरः । तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।

ततः चतुर्भिः मन्त्रैः कर्मभूमिं प्रोक्षेत् ।।

अग्निं या गर्भं दधिरे विरुपास्तान आपः शं स्योना भवन्तु ।। 1 ।।
ॐ यासां राजा वरुणो याति मध्ये सत्यानृत अवपश्यं जनानाम् ।

मधुश्चुतः शुचयो याः पावकास्तान आपः शꣳस्योना भवन्तु ।। 2 ।।
ॐ यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।

याः पृथिवीं पयसोदंति शुक्रास्तान आपः शꣳस्योना भवन्तु ।। 3 ।।
ॐ शिवेन मा चक्षुषा पश्यतापः शिवया तनु वोपस्पृशत त्त्वचं मे ।
सर्वा ꣳअग्नी ꣳरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ।। 4 ।।

6.4 वास्तुकीलनम्

चारों दिशाओं में पीपल/गूलर/पलाश के एक बित्ता (12 अंगुल) लम्बे 10 कीलों को '**ॐ नमः सुदर्शनायास्त्राय फट्**' इस मन्त्र के 108 बार जपके द्वारा अभिमन्त्रित कर निम्न मन्त्रों का आवृत्ति पूर्वक पाठ करते हुये बांध दें।

'ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यन्तरिक्षगाः। विघ्नभूताश्च ये चान्ये मम मन्त्रस्य सिद्धिषु।1।
मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः। अपसर्पन्तु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे।2।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

पुनः '**ॐ नमः सुदर्शनायास्त्राय फट्**' मन्त्र स प्रत्येक कील का पंचोपचार पूजन करके उनमें इन्द्र आदि लोकपालों का आवाहन कर पंचोपचार पूजन करें। गृह रक्षार्थ मौलीसूत्र अथवा मूंज आदि से निर्मित रस्सी से पूरे भवन को प्रदक्षिणा के क्रम से बांधें।

CC-0. Pt. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

6.5 वास्तुपूजनम्

ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽअनमीवो भवानः । यत्त्वेमहे प्रतितन्नौ जुषस्व शन्नौ भव द्विपदे शं चतुष्पदे ।।
ॐ भूर्भुवःस्वः गृहवास्तुपुरुषाय नमः। ॐ भूर्भुवःस्वः वास्तुपुरुषमावाहयामि स्थापयामि । ॐ भूर्भुवःस्वः भो वास्तुपुरुष इहागच्छ इह तिष्ठ ।।

ॐ नमो भगवते वास्तुपुरुषाय महाबल पराक्रमाय सर्वाधिवासाश्रितशरीराय ब्रह्मपुत्राय सकलब्रह्माण्डधारिणे भूभारार्पित मस्तकाय पुरपत्तनप्रासादगृहवापिसरकूपादेः सन्निवेशसान्निध्यकराय सर्वसिद्धिप्रदाय प्रसन्नवदनाय विश्वम्भराय परमपुरुषाय शक्रवरदाय वास्तोष्पते नमस्ते । ॐ भूर्भुवःस्वः वास्तोष्पतये नमः, वास्तोष्पतिमावाहयामि स्थापयामि ।। भो वास्तोष्पते इहागच्छ इह तिष्ठ ।।

अब यजुर्वेदीय पद्धति से चित्र संख्या 15 क पृष्ठ संख्या 350 में दर्शाये गये मण्डल को पीठ पर निर्माण करके रंग भरकर चित्र संख्या 15 ख पृष्ठ संख्या 350 में दर्शाये गये क्रम से आवाहनादि करें। इस 64 पद वास्तुमण्डल में वास्तुपुरुष की कल्पना करते हुये ईशानकोणस्थ पद के दक्षिणार्ध आदि में प्रदक्षिणा के क्रम से सिर आदि अंगों की कल्पना कर तत्तदंगों में स्थित तत्तद् कोष्टों में शिखी आदि देवताओं का आवाहन करें, क्योंकि कहा है कारिका में – 'ब्रह्माणमादितः कृत्वा शिखिनं वा क्रमेण तु।' अर्थात् ब्रह्मा से अथवा शिखी से आरम्भ कर वास्तुदेवताओं की स्थापना करनी चाहिये। यहाँ हम शिखी से आरम्भ कर स्थापना क्रम को दर्शा रहे हैं।

1. ईशानकोणस्थ पद के दक्षिणार्ध में वास्तुपुरुष के सिर की भावना कर उसमें शिखी देवता का आवाहन करें

'ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च।1।
तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमसे हूमहे वयम्। पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये।2।
शिखी कर्पूरधवलस्त्रिनेत्रो वृषवाहनः। वरत्रिशूलहस्तश्च वास्तोः शिरसि संस्थितः।3।
ॐ भूर्भुवःस्वः शिखिने नमः। शिरखिनमावाहयामि स्थापयामि। भो शिखिन् इह आगच्छ इह तिष्ठ।'

2. उसके दक्षिण में स्थित ड़ेढ़ पद में वास्तुपुरुष के दाहिने आंख की भावना कर उसमें पर्जन्य देवता का आवाहन करें –

'ॐ शन्नो वातः पवताꣳशन्नस्तपतु सूर्यः। शन्नः कनिक्रदद्देवः पर्जन्योऽअभिवर्षतु।1।
महाँ2ऽइन्द्रो यऽ ओजसा पर्जन्यो वृष्टिमाँ2इव। स्तोमैर्वावृधे। उपयाम गृहीतोऽअसि महेन्द्राय त्वैषते योनिर्महेन्द्राय त्वा।2।
घनस्तडित्वान्पर्जन्यो नानावर्णपरिप्लुतः। ज्योतिर्धूमश्च वातात्मा वास्तोर्दक्ष दिशि स्थितः।3।
ॐ भूर्भुवःस्वः पर्जन्याय नमः। पर्जन्यमावाहयामि स्थापयामि। भो पर्जन्य इह आगच्छ इह तिष्ठ।

3. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के दाहिने कान की भावना कर उसमें जयन्त देवता का आवाहन करें –

'ॐ मर्माणि ते वर्मणाच्छादयामि सोमस्त्वाराजा मृतेनानुवस्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवामदन्तु।1।
उदुत्यशतवेदसन्देवं वहन्तिकेतवः। दृशे विश्वाय सूर्यम्।2।
जटिलः श्मश्रुलः शीतः कमण्डल्वक्षसूत्रधृक्। जयन्तोऽब्जासनो गौरो वास्तोर्दक्षे ह्यवस्थितः ।3।
ॐ भूर्भुवःस्वः जयन्ताय नमः। जयन्तमावाहयामि स्थापयामि। भो जयन्त इह आगच्छ इह तिष्ठ। '

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

4. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के दाहिने अंस (दाहिनी गर्दन) की भावना कर उसमें कुलिशायुध देवता का आवाहन करें –

'ॐ आयान्त्विन्द्रो वसऽ उपनऽइह स्तुतः सधमादस्तु शूरः। वावृधानस्तविषीर्यस्य पूर्वी द्यौर्नक्षत्रिमभिभूति पुष्यात्।1।
इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः। देवसेनानामभि भञ्जतीनाम्जयन्तीनाम्मरुतो यन्त्वग्रम्।2।
इन्द्र ऐरावता रूढः पीतो दैत्यविमर्दनः। कुलिशाख्यकरो वास्तोर्दक्षिणांसे समाश्रितः।3।
ॐ भूर्भुवःस्वः इन्द्राय नमः। इन्द्रमावाहयामि स्थापयामि। भो इन्द्र इह आगच्छ इह तिष्ठ।'

5. उसके दक्षिण में स्थित दो पद में वास्तुपुरुष के दाहिने बाहु (कन्धा) की भावना कर उसमें सूर्य देवता का आवाहन करें –

'ॐ बणमहाँ2ऽअसि सूर्य बडादित्यमहाँ2ऽअसि। महस्ते सतो महिमापनस्यतेद्धा देवमहाँ2ऽअसि।1।
सूर्य रश्मिर्हरिकेशः पुरस्ताज्ज्योतिरुदयाँ2ऽअजस्रम्। तस्य पूषा प्रसवे याति विद्वान्सम्पश्यन्विश्वा भुवनानि गोपाः।2।
सूर्यो रक्तो ग्रहाध्यक्षो घृताञ्चो द्विभुजः प्रभुः। सप्ताश्वरथगो वास्तोर्दक्षबाहुसमाश्रितः।3।
ॐ भूर्भुवःस्वः सूर्याय नमः। सूर्यमावाहयामि स्थापयामि। भो सूर्य इह आगच्छ इह तिष्ठ।'

सपत्नीकवनस्थानां स्थितिन्यासो विधीयते। विद्यार्थीनामथैतेषां सृष्ट्यन्तोऽपि विशिष्यते।।'

अर्थात् संहार न्यास दोषों को नष्ट करता है, सृष्टिन्यास पुत्र-पौत्रादि देता है और स्थिति न्यास शान्ति को बढाता है, अतः तीनों न्यासों को करना चाहिये। सृष्टिन्यास ब्रह्मचारियों केलिये कहा गया है, सर्वसिद्धिप्रद स्थितिन्यास गृहस्थों केलिये उपदिष्ट है और अपत्नीक वानप्रस्थ, संन्यासी एवं विरक्त गृहस्थों केलिये संहारन्यास का विधान किया गया है। सपत्नीक वानप्रस्थों केलिये स्थितिन्यास और विद्यार्थियों केलिये सृष्टि व संहार न्यास का विशेष तौर पर विधान किया गया है।

7.1/2 मातृकान्यासः -

'प्रथमो मातृकान्यासो देवसारूप्यदः स्मृतः।'

अर्थात् ऐसे कहा गया है कि मातृका न्यास पहला न्यास है जो देवता की सारूप्यता को देता है।

ॐ अं नमः - मूध्नि,	**ॐ आं नमः** - ललाटे,	**ॐ इं नमः** - दक्षिणनेत्रे,	**ॐ ईं नमः** - वामनेत्रे,
ॐ उं नमः - दक्षिणकपोले,	**ॐ ऊं नमः** - वामकपोले,	**ॐ ऋं नमः** - दक्षिणकर्णे,	**ॐ ॠं नमः** - वामकर्णे,
ॐ लृं नमः - दक्षनासापुटे,	**ॐ ॡं नमः** - वामनासापुटे,	**ॐ एं नमः** - ऊर्ध्वोष्ठे,	**ॐ ऐं नमः** - अधरोष्ठे,
ॐ ओं नमः-ऊर्ध्वदन्तपंक्तौ,	**ॐ औं नमः** अधोदन्तपंक्तौ,	**ॐ अं नमः** - शिखायाम्,	**ॐ अः नमः** - तालुनि,

ॐ कं नमः - दक्षिणबाहुमूले,
ॐ खं नमः - दक्षिणकूपरे,
ॐ गं नमः - दक्षिणमणिबन्धे,
ॐ घं नमः - दक्षिणकरांगुलिमूले,
ॐ ङं नमः-दक्षिणकरांगुल्यग्रे,
ॐ चं नमः - वामबाहुमूले,
ॐ छं नमः - वामकूपरे,
ॐ जं नमः - वाममणिबन्धे,
ॐ झं नमः-वामकरांगुलिमूले,
ॐ ञं नमः - वामकरांगुल्यग्रे,
ॐ टं नमः - दक्षिणपादमूले,
ॐ ठं नमः - दक्षिणजानुनि,
ॐ डं नमः-दक्षिणपादगुल्फे,
ॐ ढं नमः-दक्षिणपादांगुलिमूले,
ॐ णं नमः-दक्षिणपादांगुल्यग्रे,
ॐ तं नमः-वामपादमूले,
ॐ थं नमः वामजानुनि,
ॐ दं नमः-वामपादगुल्फे,
ॐ धं नमः-वामपादांगुलिमूले,
ॐ नं नमः-वामपादांगुल्यग्रे,
ॐ पं नमः - दक्षिणपार्श्वे,
ॐ फं नमः - वामपार्श्वे,
ॐ बं नमः -पृष्ठे,
ॐ भं नमः - नाभौ,
ॐ मं नमः - उदरे,
ॐ यं नमः - त्वचि,
ॐ रं नमः - असृजि,
ॐ लं नमः - मांसे,
ॐ वं नमः - स्नायुषु,
ॐ शं नमः-अस्थिनि,
ॐ षं नमः-मज्जायाम्,
ॐ सं नमः - मेदसि,
ॐ हं नमः - शुक्रे,
ॐ क्षं नमः - सर्वांगे।

7.2 सारस्वतन्यासः -

'द्वितीयस्तु सारस्वतो येन दुरितं च जाड्यं।। वाक्पापसंचयं सदा विलयं भवति तथा।'

अर्थात् सारस्वत न्यास दूसरा न्यास है जिससे कर्ता के दुरित, जड़ता और वाणी द्वारा कृत पापों का संचय सदा केलिये नष्ट होता है।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ ए ह्रीं क्लीं कनिष्ठिकाभ्यां नमः, ॐ ऐं ह्रीं क्लीं अनामिकाभ्यां नमः, ॐ ऐं ह्रीं क्लीं मध्यमाभ्यां नमः,
ॐ ऐं ह्रीं क्लीं तर्जनीभ्यां नमः, ॐ ऐं ह्रीं क्लीं अंगुष्ठाष्यां नमः, ॐ ऐं ह्रीं क्लीं करतलाभ्यां नमः,
ॐ ऐं ह्रीं क्लीं करपृष्ठाभ्यां नमः, ॐ ऐं ह्रीं क्लीं स्फाराभ्यां नमः, ॐ ऐं ह्रीं क्लीं मणिबन्धाभ्यां नमः,
ॐ ऐं ह्रीं क्लीं हृदयाय नमः, ॐ ऐं ह्रीं क्लीं शिरसे स्वाहा नमः, ॐ ऐं ह्रीं क्लीं शिखायै वषट् नमः,
ॐ ऐं ह्रीं क्लीं कवचाय हुम् नमः, ॐ ऐं ह्रीं क्लीं नेत्रत्रयाय वौषट् नमः, ॐ ऐं ह्रीं क्लीं अस्त्राय फट् नमः,
ॐ ऐं ह्रीं क्लीं पूर्वायै नमः, ॐ ऐं ह्रीं क्लीं अग्नये नमः, ॐ ऐं ह्रीं क्लीं दक्षिणायै नमः,
ॐ ऐं ह्रीं क्लीं निर्ऋतये नमः, ॐ ऐं ह्रीं क्लीं पश्चिमायै नमः, ॐ ऐं ह्रीं क्लीं वायव्यै नमः,
ॐ ऐं ह्रीं क्लीं उत्तरायै नमः, ॐ ऐं ह्रीं क्लीं ईशानायै नमः, ॐ ऐं ह्रीं क्लीं ऊर्ध्वायै नमः, ॐ ऐं ह्रीं क्लीं अधस्तान्नमः।

7.3 मातृगणन्यासः

'तृतीयस्तु मातृगणो भूत्वा सर्वलोकप्रियः।। येन लोकेषु निर्भयः.....'

अर्थात् मातृगण न्यास तीसरा न्यास है जिससे कर्ता सर्वदेवप्रिय होकर तीनों लोकों में निर्भय होता है।

ॐ ब्रह्माणी मां पूर्वतः पातु, ॐ माहेश्वरी मामाग्नेयां पातु, ॐ कौमारी मां दक्षिणे पातु, ॐ वैष्णवी मां नैर्ऋत्यां पातु,
ॐ वाराही मां पश्चिमे पातु, ॐ नारसिंही मां वायव्यां पातु, ॐ इन्द्राणी मामुत्तरे पातु, ॐ चामुण्डा मामीशान्यां पातु,
ॐ व्योमेश्वरी मामूर्ध्व पातु, ॐ सप्तद्वीपेश्वरी मां भुवि पातु, ॐ नागेश्वरी मामधः पातु।

7.4 जरामृत्युनाशकन्यासः

'.....जरामृत्युनाशकश्च। तुरीयो न्यासो येनाग्निवारिभ्यां निर्भयो भवेत्।।'

CC-0. Shri Satyam Sadhana Kuti, Rishikesh. Digitized by Muthulakshmi Research Academy

अर्थात् जरामृत्युनाशक न्यास चौथा न्यास है जिससे कर्ता अग्नि और जल से निर्भय होकर उनसे संभावित मृत्यु को नष्ट कर लेता है।

ॐ कमलांकुशमण्डिता नन्दजा पूर्वांगं मे पातु, **ॐ खड्गपात्रधरा रक्तदन्तिका दक्षिणांगं मे पातु,**
ॐ पुष्पपल्लवमूलादिहस्ता शाकम्भरी पश्चिमांगं मे पातु, **ॐ धनुर्बाणधरा दुर्गार्तिहारिणी दुर्गा वामांगं मे पातु,**
ॐ शिरःपात्रकरा भीमा मस्तकाच्चरणावधि मे पातु, **ॐ चित्रकान्तिभृद्भ्रामरी चरणान्मस्तकावधि मे पातु।**

7.5 वशीकरणाभेद्यन्यासः

'पंचमो वशीकरणो न्यासोऽभेद्यो येन कर्ता। महापापातिपापाभ्यां मुक्तः स्यान्नात्र संशयः।।'

अर्थात् वशीकरणाभेद्य न्यास पांचवां न्यास है जिससे कर्ता महापापों और अतिपापों से अवश्य मुक्त होता है।

ॐ ऐं पादादिनाभिपर्यन्तं ब्रह्मा मां पातु, **ॐ श्रीं नाभेर्विशुद्धिपर्यन्तं जनार्दनो मां पातु,**
ॐ हंसौं विशुद्धेः शिखापर्यन्तं त्रिलोचनो रुद्रो मां पातु, **ॐ ऐं हंसौं मे करद्वन्द्वं पातु,**
ॐ हंसौं वृषभः चक्षुषी मे पातु, **ॐ ह्रीं गजाननः सर्वांगं मे पातु,**
ॐ ह्रीं आनन्दमयो हरिः परापरौ देहभागौ मे पातु।

7.6 सद्गतिप्रापकन्यासः -

'सद्गतिप्रापको न्यासः सर्वकष्टोपशामकः। षष्ठः स्याद्येन च कृतो वैकुण्ठसुखप्रापकः।।'

अर्थात् सद्गतिप्रापक न्यास छटा न्यास है जिससे कर्ता के समस्त कष्ट शान्त होकर वैकुण्ठ लोक के सुख के समान सुख प्राप्त करेगा।

ॐ ह्रीं अष्टादशभुजा महालक्ष्मी मध्यमांगं मां पातु, **ॐ ऐं अष्टभुजा सरस्वती ऊर्ध्वं मां पातु,**

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ क्लीं त्रिंशल्लोचना महाकाली अधो मां पातु, **ॐ क्षौं सिंहो हस्तद्वयं मां पातु,**
ॐ ऐं परमहंसोऽक्षिमण्डलं मां पातु, **ॐ ह्रीं महिषारूढः प्रेतः पदद्वयं मां पातु,**
ॐ हंसौं महेशश्चण्डिकायुक्तः सर्वगं मां पातु।

7.7 रोगनाशन्यासः

'रोगनाशकन्यासोऽयं सप्तमो येन भवति। सर्वरोगक्षयादायुः दीर्घश्च भवति नित्यं।।'

अर्थात् रोगनाशक नामक यह न्यास सातवां है जिससे समस्त रोगों का क्षय होने से अवश्य ही दीर्घ आयु की प्राप्ति होगी।

ॐ ऐं नमः - ब्रह्मरन्ध्रे, **ॐ ह्रीं नमः** - दक्षिणनेत्रे, **ॐ क्लीं नमः** - वामनेत्रे,
ॐ चां नमः - दक्षिणकर्णे, **ॐ मुं नमः** - वामकर्णे, **ॐ डां नमः** - दक्षिणनासापुटे,
ॐ यैं नमः - वामनासापुटे, **ॐ विं नमः** - मुखे, **ॐ च्चें नमः** - गुदे।

7.8 सर्वदुःखहरन्यासः

'सर्वदुःखहरो न्यासः विलोमाक्षरश्चाष्टमः। येन यथा नाम तथा फलं भवत्यसंशयः।।'

अर्थात् सर्वदुःखहर न्यास आठवां है जो मन्त्र के विलोमाक्षरों से किया जाता है जिससे अपने नाम के अनुसार ही फल है यानि समस्त प्रकार के दुःख नष्ट हो जाते है, इसमें कोई संशय नहीं।

ॐ च्चें नमः - पायौ, **ॐ विं नमः** - मुखे, **ॐ यैं नमः** - वामनासापुटे, **ॐ डां नमः** - दक्षिणनासापुटे,
ॐ मुं नमः - वामकर्णे, **ॐ चां नमः** - दक्षिणकर्णे, **ॐ क्लीं नमः** - वामनेत्रे, **ॐ ह्रीं नमः** - दक्षिणनेत्रे, **ॐ ऐं नमः** - ब्रह्मरन्ध्रे।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

7.9 देवताप्राप्तिकृन्न्यासः

'देवताप्राप्तिकृन्न्यासो नवमो मूलव्यापकः। येन भवति साधको देववत्सदा निर्भयः।।'

अर्थात् देवप्राप्तिकृत् नाम का यह न्यास नौवां है जो मूल मन्त्र से व्याप्त है जिससे साधक देवता के सामान होकर निर्भय हो जाता है।

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे -सामने मस्तक से चरण पर्यन्त, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे**-सामने ही चरण से मस्तक पर्यन्त,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे -दाहिने मस्तक से चरण पर्यन्त, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे**-दाहिने ही चरण से मस्तक पर्यन्त,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे -पीछे मस्तक से चरण पर्यन्त, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे**-पीछे ही चरण से मस्तक पर्यन्त,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे -बायें मस्तक से चरण पर्यन्त, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे**-बायें ही चरण से मस्तक पर्यन्त।

7.10 त्रैलोक्यवशकृन्न्यासः

'त्रैलोक्यवशकृन्न्यासो दशमो येन साधकः। वाक्सिद्धो दृक्सिद्धिश्चैव भवेन्नान्यथा कदाचित्।।'

अर्थात् यह त्रैलोक्यवशकृत् नाम का दसवें न्यास को जो साधक करता है वह वाक् सिद्धि और दृष्टि सिद्धि से युक्त होगा यानि वह जो कहेगा वही होगा और वह जिसे जैसे देखेगा वह वैसे ही हो जायेगा, कभी विपरीत नहीं।

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे - हृदयाय नमः, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** - शिरसे स्वाहा,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे - शिखायै वषट्, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** - कवचाय हुम्,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे - नेत्रत्रयाय वौषट्, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** - अस्त्राय फट्,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे - अंगुष्ठाभ्यां नमः, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** - तर्जनीभ्यां नमः,
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे - मध्यमाभ्यां नमः, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** - अनामिकाभ्यां नमः,

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे - कनिष्ठिकाभ्यां नमः, **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे** - करतलकरपृष्ठाभ्यां नमः।

7.11 सर्वरक्षाकरन्यासः

'एकादशः सर्वरक्षाकरो न्यासो दशमन्याससमफलदायकः।।'

अर्थात् ग्यारहवां न्यास है सर्वरक्षाकर न्यास। इसका फल दसवें न्यास के फल के समान ही है।

(**'आद्यं वाग्बीजं ऐं श्यामवर्णं ध्यात्वा सर्वांगे विन्यसेत्।'** अर्थात् काले रंग युक्त वाग्बीज **ऐं** का ध्यान करते हुये निम्न श्लोकों का पाठ करते हुए अपने शरीर के अंगों की कल्पना करते हुये न्यास करें।)

'ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा। शङ्खिनी चापिनी बाणभुशुण्डिपरिघायुधा।।1।।
सौम्या सौम्यतराशेषसौमेभ्यस्त्वतिसुन्दरी। परापराणां परमा त्वमेव परमेश्वरी।।2।।
यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके। तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा।।3।।
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत्। सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः।।4।।
विष्णुः शरीरग्रहणमहमीशान एव च। कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत्।।5।।'

'द्वितीयं मायाबीजं ह्रीं बालार्कवर्णं ध्यात्वा सर्वांगे विन्यसेत्।' अर्थात् बालसूर्य के रंग से युक्त मायाबीज **ह्रीं** का ध्यान करते हुये निम्न श्लोकों का पाठ करते हुए अपने शरीर के अंगों की कल्पना करते हुये न्यास करें।)

'शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके। घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च।।1।।
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे। भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि।।2।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते। यानि चात्यर्थघोराणि तै रक्षऽस्मांस्तथा भुवम्।3।।
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके। करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः।।4।।'

('**तृतीयं कामबीजं क्लीं स्फटिकाभासं ध्यात्वा सर्वांगे विन्यसेत्।**' अर्थात् स्फटिक के समान अतिशुभ्र सफेद रंग से युक्त काम बीज **क्लीं** का ध्यान करते हुये निम्न श्लोकों का पाठ करते हुए अपने शरीर के अंगों की कल्पना करते हुये न्यास करें।)

'सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते। भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते।।1।।
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्। पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते।।2।।
ज्वालाकरालमत्युग्रमशेषासुरसूदनम्। त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते।।3।।
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्। सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव।।4।।
असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः। शुभाय खड्गो भवतु चण्डिके त्वां नता वयम्।।5।।'

8 अथ उपचाराः -

8.1-1 अथ ध्यानम् -

'ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्।।1।।
खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः, शंखं सन्दधतीं करैस्त्रिनयनां सर्वांगभूषावृताम्।
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां, यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्।।1।।
ॐ श्रीश्च ते लक्ष्मीश्च पक्त्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्मऽइषाण

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

सर्वलोकम्मऽइषाण।।2।।

अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकां, दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम्।
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां, सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम्।।2।।

ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धिया वसुः।।3।।

घण्टाशूलहलानिशंखमुसले चक्रं धनुःसायकं, हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्।
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा, पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्।।3।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः श्रीदुर्गा ध्यायामि।'

8.1-2 आवाहनम् -

'ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह।।1।।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिꣳसर्वतस्पृत्त्वात्यतिष्ठद्दशांगुलम्।।2।।

ॐ महिषघ्नीं महादेवीं कुमारीं सिंहवाहिनीम्। दानवांस्तर्जयन्तीं च सर्वकामदुघां शिवाम्।।1।।
शंखचक्रगदाहस्ते शुभ्रवर्णे शुभानने। आवाहयाम्यहं देवि सर्वकामार्थसिद्धये।।2।।
विश्वेश्वरि महादेवि सर्वसम्पत्प्रदायिनी। पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये।।3।।
मम यज्ञे समागच्छ तिष्ठ देवगणैः सह। यावद्यज्ञः समाप्येत तावत्त्वं सुस्थिरा भव।।4।।'

अथवा

आगच्छेह महादेवि सर्वसम्पत्प्रदायिनि। यावद् व्रतं समाप्येत तावत्त्वं सन्निधौ भव।।4।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः श्रीदुर्गामावाहयामि, आवाहनं समर्पयामि। आवाहनार्थे पुष्पाक्षतान् समर्पयामि।'

8.2 आसनम् –

'ॐ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।।1।।
ॐ पुरुषऽएवेदꣳसर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति।।2।।
अनेकरत्नसंयुक्तं नानामणिगणान्वितम्। कार्तस्वरमयं दिव्यमासनं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, आसनं समर्पयामि। आसनार्थेअक्षतान् समर्पयामि।'

8.3 पाद्यम् –

'ॐ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम्।।1।।
ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्यविश्वा भूतानि त्रिपादस्यामृतं दिवि।।2।।
गंगादिसर्वतीर्थेभ्य आनीतं तोयमुत्तमम्। पाद्यार्थं ते प्रदास्यामि गृहाण परमेश्वरी।।1।।'

अथवा

'गंगादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतम्। तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, पादयोः पाद्यं समर्पयामि।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized By Muthulakshmi Research Academy

8.4 अर्घ्यम् -

'ॐ कां सोऽस्मितां हिरण्यप्रकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्।।1।।
ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः। ततो विष्वं व्यक्रामत्साशनानशनेऽअभि।।2।।
गन्धपुष्पाक्षतैर्युक्तमर्घ्यं सम्पादितं मया। गृहाण त्वं महादेवि प्रसन्ना भव सर्वदा।।1।।

अथवा

निधीनां सर्वदेवानां (सर्वरत्नानां) त्वमनर्घ्यगुणा ह्यसि। सिंहोपरिस्थिते देवि गृहाणार्घ्यं नमोऽस्तु ते।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
हस्तयोः अर्घ्यं समर्पयामि।'

8.5/1 आचमनम् -

'ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वां वृणे।
ॐ ततो विराडजायत विराजोऽअधि पूरुषः। स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः।।2।।
कर्पूरेण सुगन्धेन सुरभि स्वादु शीतलम्। तोयमाचमनीयार्थं देवि त्वं (देवीदं) प्रतिगृह्यताम्।।1।।
ॐ भूभुर्वःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
मुखे आचमनीयं जलं समर्पयामि।'

8.5/2 मधुपर्कः -

'ॐ यन्मधुनो मधव्यं परमछरूपमन्नाद्यम्। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि।1।

दधिमधुघृतसमायुक्तं(आज्यं दधि मधु श्रेष्ठं) पात्रयुग्मसमन्वितम्। मधुपर्कं गृहाण त्वं शुभदा भव शोभने।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, मुखे मधुपर्कं समर्पयामि।'

8.5/3 पुनराचमनम् -

'ॐ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मिनीमीं शरणमहं प्रपद्येऽअलक्ष्मीर्मे नश्यतां त्वां वृणे

ॐ ततो विराडजायत विराजोऽअधि पूरुषः। स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः।।2।।

कर्पूरेण सुगन्धेन सुरभि स्वादु शीतलम्। तोयमाचमनीयार्थं देवि त्वं प्रतिगृह्यताम्।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, मुखे पुनराचमनीयं जलं समर्पयामि।'

8.6/1 स्नानम् - (मूर्ति/यन्त्र को एक बड़े बर्तन/पारात पर रख कर सब प्रकार के स्नान करायें।)

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

'ॐ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः।।1।।
ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।।2।।
मन्दाकिन्याः समानीतैर्हेमाम्भोरुहवासितैः। स्नानं कुरुष्व देवेशि सलिलैश्च सुगन्धिभिः।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
सर्वांगे स्नानीयं जलं समर्पयामि।'

8.6/2 पुनराचमनीयम् -

'ॐ उच्छिष्टोप्यशुचिर्वापि यस्याः स्मरणमात्रतः। शुद्धिमाप्नोति तस्यै ते पुनराचमनीयकम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
मुखे पुनराचमनीयं जलं समर्पयामि।'

8.6/3 सुगन्धीद्रव्यस्नानम् -

'ॐ अꣳशुना तेऽअꣳशुः पृच्यतां परुषा परुः। गन्धस्ते सोममवत्तु मदाय रसोऽअच्युतः।।1।।
स्नेहं गृहाण स्नेहेन लोकेश्वरि महानघे। सर्वलोकेषु सर्वेशे ददामि स्नेहमुत्तमम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
सर्वांगे सुगन्धिद्रव्यं समर्पयामि।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

8.6/4 दुग्धस्नानम् -

'ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।।1।।
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पये।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
दुग्धस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि।'

8.6/5 दधिस्नानम् -

'ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखात्करत्प्रणऽआयूꣳषि तारिषत्।।1।।
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देवि स्नानर्थं प्रतिगृह्यताम्।।1।।
ॐ भूभुर्वःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
दधिस्नानं समर्पयामि। दधिस्नानान्ते शुद्धोदकस्नानं समर्पयामि।'

8.6/6 घृतस्नानम् -

'ॐ घृतं घृतपावानः पिबत वसां वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा।
दिशः प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा।।1।। अथवा
ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतं वस्य धाम।
अनुष्वधमावह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्यम्।।1।।
नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्।।1।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, घृतस्नानं समर्पयामि। घृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.6/7 मधुस्नानम् -

'ॐ मधुवाताऽऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधुद्यौरस्तु नः पिता।। मधुमान्नो वानस्पतिर्मधुमाँ३ऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।।1।। दिव्यै पुष्पैः समुद्भूतं सर्वगुणसमन्वितम्। मधुरं मधुनामाढ्यं स्नानार्थं प्रतिगृह्यताम्।।1।। ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, मधुस्नानं समर्पयामि। मधुस्नानान्ते शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.6/8 शर्करास्नानम् -

'ॐ अपाꣳरसमुद्वयसꣳसूर्ये सन्तꣳसमाहितम्। अपाꣳरसस्य यो रसन्तं वो गृह्णाम्युत्तममुपयामगृहीतोऽसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्।।1।।

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्।।1।। ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

अथवा पूर्वोक्त दूध, दही, घी, शहद और चीनी के संमिश्रित **पंचामृत** से स्नान करायें -

'ॐ पंच नद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पंचधासो देशेऽभवत्सरित्।।1।।
पयो दधि घृतं चैव मधुञ्च शर्करान्वितम्। पंचामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
पंचामृतस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.6/9 गन्धोदकस्नानम् -

'ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।1।।

अथवा

ॐ त्वां गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः। त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत।।1।।
मलयाचलसम्भूतं चन्दनागुरुसम्भवम्। चन्दनं देवि देवेशि स्नानार्थं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
गन्धोदकस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.6/10 उद्वर्तनस्नानम् -

'ॐ अꣳशुनातेऽअꣳशुः पृच्यतां परुषा परुः। गन्धस्ते सोममवतु मदाय रसोऽअच्युतः।।1।।
नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

उद्वर्तनस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.6/11 महाभिषेकस्नानम् -

श्रीसूक्त अथवा पुरुषसूक्त का पाठ करते हुये शंख से मूर्ति/यन्त्र पर जलधारा छोड़ें।

'ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, महाभिषेकस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.6/12 शुद्धोदकस्नानं -

'ॐ शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः। श्येताक्ष्योऽरुणस्ते रुद्राय पशुपतये कर्णा यामाऽअवलिप्ता रौद्रा नभोरूपाः पार्जन्याः।।1।।

शुद्धं यत्सलिलं दिव्यं गंगाजलसमं प्रभं समर्पितं मया भक्त्या स्नानार्थं प्रतिगृह्यताम्।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, महाभिषेकस्नानं समर्पयामि। शुद्धोदकस्नानं समर्पयामि। आचमनीयं जलं समर्पयामि।'

(सूखे कपड़े से मूर्ति/यन्त्र को पोंछ कर सुखावे पुनः कलश पर स्थापित करें।)

8.6/13 पादुकार्पणम् -

'नवरत्नयुते मयाऽर्पिते कमनीये तपनीयपादुके। सविलासमिदं पदद्वयं कृपया देवि तयोर्निधीयताम्।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, चरणयोः पादुके समर्पयामि।'

8.7/1 वस्त्रोपवस्त्रम् -

'ॐ उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे।।1।।
ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे। छन्दांꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।2।।
पट्टकूलयुगं देवि कंचुकेन समन्वितम्। परिधेहि कृपां कृत्वा दुर्गे दुर्गतिनाशिनि।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, वस्त्रोपवस्त्रं समर्पयामि। आचमनीयं जलं समर्पयामि।'

8.7/2 केशपाशसंस्कारः (कंघी) -

'बहुभिरगरुधूपैः सादरं धूपयित्वा भगवति तव केशान् कंकतैर्मार्जयित्वा ।
सुरभिभिररविन्दैश्चम्पकैश्चार्चयित्वा झटिति कनकसूत्रैर्जूटयन्वेष्टयामि।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, वेणीबन्धनार्थे केशपाशसंस्कारं समर्पयामि।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

8.8/1 यज्ञोपवीतम् -

'ॐ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम्। अभूतिमसंमृद्धिं च सर्वां निर्णुद मे गृहात्।।1।।
ॐ तस्मादश्वाऽजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः।।2।।
स्वर्णसूत्रं महदिव्यं ब्रह्मणा निर्मितं पुरा। उपवीतं मया दत्तं गृहाण परमेश्वरि।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि।' अथवा

सौभाग्यसूत्रं (मंगलसूत्रम्) -

'सौभाग्यसूत्रं वरदे सुवर्णमणि संयुतम्। कण्ठे बध्नामि देवेशि सौभाग्यं देहि मे सदा।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, सौभाग्यसूत्रं समर्पयामि।'

8.8/2 अक्षतान् -

'ॐ अक्षन्नमीमदन्त ह्यव प्रियाऽअधूषत। अस्तोषत स्वभानवो विप्रानविष्ठया मती योजान्विन्दते हरि।।1।।
अक्षतान्निर्मलान्दिव्यान् कुंकुमाक्तान्सुशोभितान्। गृहाणेमान्महादेवि प्रसीद परमेश्वरि।।1।।

अथवा

अक्षतान्निर्मलान् शुद्धान्मुक्ताफलसमन्वितान्। गृहाणेमान्महादेवि देहि मे निर्मलो धियम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
अक्षतान् समर्पयामि।'

8.9 गन्धादिद्रव्याणि - (तदन्तर्गतानि इमानि समर्पणियानि -)

8-9/1 चन्दनानुलेपनम् -

'ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।।1।।
ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः। तेन देवाऽअजायन्त साध्याऽऋषयश्च ये।।2।।
श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं च देवेशि चन्दनं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, चन्दनं समर्पयामि।'

8.9/2 दूर्वाकुरान् - (दुर्गा को सफेददूर्वा अर्पण करना निषिद्ध है।)

'ॐ आर्द्राम्पुष्करिणीम्पुष्टिम्पिंगलाम्पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जात वेदो मऽआवह।।1।।
ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि। एवा नो दूर्वे प्रतनु सहस्रेण शतेन च।।2।।
दूर्वादले श्यामले त्वं महीरूपे हरिप्रिये। दूर्वाभिराभिर्भवतीं पूजयामि सदा शिवे।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, दूर्वाकुरान्समर्पयामि।'

8.9/3 बिल्वपत्राणि -

'ॐ आर्द्रां यः करिणीं यष्टिं सुवर्णां हेममालिनीम्। सूर्यां हिरण्मयीं लक्ष्मीं जात वेदो मऽआवह।।1।।
ॐ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः। श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहननाय्य च। ।2।।

CC-0. Shri Satyam Sadhanalayam Trust, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

अमृतोद्भवः श्रीवृक्षो महादेवप्रियः सदा। बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
बिल्वपत्रं समर्पयामि।'

8.9/4 पल्लवान् -

'ॐ तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यम्प्रभूतिं गावो दास्योऽश्वान्विन्देयम्पुरुषानहम्।।1।।
ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाजऽइत्किलासथ यथशनवथ पूरुषम्।।1।।
गृहद्वारे चोग्रमपि दुष्टासुरनिगर्हिणि। पूजां करोमि चार्वंगि पल्लवैर्नन्दनोद्भवैः।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, पल्लवान्समर्पयामि।'

8.9/5 फलमालाम् -

'ॐ याः फलिनीर्याऽअफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुंचन्त्वꣳहसः।।1।।
ॐ महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि। तन्नो देवी प्रचोदयात्।।2।।
शरत्काले समुद्भूतां निशुम्भासुरमर्दिनि। फलमालां वरां देवि गृहाण सुरपूजिते।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, पुष्पमालां समर्पयामि।'

8.9/6 आभूषणम् (समस्त अलंकारों को एक साथ) -

'ॐ युवं तमिन्द्रापर्वतापुरोयुधा यो नः पृतन्यादपतन्तमिद्धतं वज्रेण तन्तमिद्धताम्। दूरे च ता यच्छन्त्सद्गहनं यदनिक्षत्।1।

अस्माकꣳशत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः। सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः सुपोषाः पोषैः।।2।।
हारकंकणकेयूरमेखलाकुण्डलादिभिः। रत्नाढ्यं कुण्डलोपेतं भूषणं प्रतिगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, आभूषणं समर्पयामि।'

अथवा प्रत्येक आभूषण को अलग-अलग निम्न मन्त्रों से समर्पण करें और अलंकार का अभाव हो तो अक्षत अर्पण करें।

8.9/6-1 सौवीरांजनम् (सुरमा) -

'सौवीरांजनमिदमम्ब चक्षुषो विन्यस्तं कनकशलाकया मया यत्। तन्नूनं मलिनमपि त्वदक्षिसंगाद्
ब्रह्मेन्द्राद्यभिलषिणीयतामियाय।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
चक्षुषोः सौवीरांजनं समर्पयामि।'

8.9/6-2 कंकणादि मणिबन्धभूषणानि -

'माणिक्यमुक्तामणिखण्डयुक्ते सुवर्णकारेण संस्कृते ये ते।
किंकिणीभिः स्वरिते सुवर्णे मयाऽर्पिते देवि गृहाण कंकणे।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
मणिबन्धयोः कंकणादिकं समर्पयामि।'

CC-0. Satyam Sadana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

8.9/6-3 कुण्डलादि कर्णभूषणानि -

'ययोः शुभान्याखचितानि मातर्माणिक्यखण्डानि सुशोभनानि। ताटंकयुग्मे कनकस्य कृत्वा मयाऽर्पिते देवि गृहाण चैते।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
कर्णयोः कुण्डलादिकं समर्पयामि।'

8.9/6-4 अंगदम् -

'हेम्ना कृतं ह्यंगदयुग्मकं च मनोहरं सुन्दरचित्रयुक्तम्। बाह्योर्गृहाणाऽऽशु मयाऽर्पितं ते मनोज्ञमाभूषणभूषणोत्तमम्।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
बाह्वोः अंगदे समर्पयामि।'

8.9/6-5 अंगुलीयकम् (अंगूठी) -

'बालगोमदमयैश्च रत्नैः कृतां तथा हेममयां मनोहराम्। तस्यां कुरु त्वं मुखवीक्षणं च गृहाण दिव्यांगुलिमुद्रिकां च।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
करांगुलीषु अंगुलीयकानि समर्पयामि।'

8.9/6-6 कटिभूषणम् (मेखलां) -

'कांचीं शुभां हाटकनिर्मितां मया त्रैलोक्यमातः कटिभूषणाय। दत्तां यथेमां त्वमजे च धत्से ह्युद्धर्तुमस्मान्वह मातृगर्भात्।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
कटिदेशे कटिभूषणं (कांचीं) समर्पयामि।'

8.9/6-7 नूपुरम् (पायल) -

'सुसुन्दरे हारकनिर्मिते द्वे पादांगदे नूपुरनामधेये। गृहाण मातः पदयोः प्रदत्ते सुकिंकिणीभिच विराजिते ते।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
पादयोः नूपुरे समर्पयामि।'

8.9/6-8 मुकुटम् -

'मातस्तवेमं मुकुटं हरिनमणिप्रवालमुक्तामणिभिर्विराजितम्। गारुत्मतैश्चापि मनोहरं कृतं गृहाण मातः शिरसो विभूषणम्।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
शिरसि मुकुटं समर्पयामि।'

8.9/6-9 रत्नमालाम्/हार-

'ॐ कर्दमेन प्रजाभूता मयि सम्भव कर्दम। श्रियम्वासय मे कुले मातरम्पद्ममालिनीम्।।1।।
ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे।।1।।
मुक्ताफलयुतां मालां रत्नवैडूर्यसुप्रभाम्। माणिक्यस्वर्णग्रथितां गृह्यतां परमेश्वरि।।1।।
मातस्त्वदर्थञ्च मणिमौक्तिकाभिः कृतं मनोज्ञं कलकण्ठभूषणम्।

CC-0. Shri Shyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

मयैव कण्ठे तव देवि चाऽर्पितं ग्रैवेयकं नाम गृहाण भूषणम्।।2।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, रत्नमालां/हारं समर्पयामि।'

8.9/6-10 नानापरिमलद्रव्याणि -

'ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान् पुमाꣳसं परिपातु विश्वतः। अबीरं च गुलालं च हरिद्रादिसमन्वितम्। नानापरिमलं द्रव्यं गृहाण परमेश्वरि।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, नानापरिमलद्रव्याणि समर्पयामि।'

8.9/6-11 सौभाग्यद्रव्याणि -

'ॐ कर्दमेन प्रजाभूता मयि सम्भव कर्दम। श्रियं वासय मे कुले मातरं पद्ममालिनीम्।।1।।

ॐ ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत।।2।।

हरिद्रा कुंकुमं चैव सिन्दूरादिसमन्वितम्। सौभाग्यद्रव्यमेतद्वै गृहाण परमेश्वरि।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, सौभाग्यद्रव्याणिं समर्पयामि।' (अथवा हरिद्रा आदि प्रत्येक को अलग-अलग निम्न विधि से समर्पित कर सकते हैं।)

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized By Muthulakshmi Research Academy

8.9/6-12 हरिद्राचूर्णम् -

'ॐ तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततꣳसंजभार। यदेदयुक्त हरितः सधस्थाद्रात्री वासस्तनुते सिमस्मै।।1।।
हरिद्रारंजिते देवि सुखसौभाग्यदायिनि। तस्मात्त्वां पूजयाम्यत्र सुखं शान्तिं प्रयच्छ मे।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
हरिद्राचूर्ण समर्पयामि।'

8.9/6-13 कुंकुमम् (गुलालं वा) -

'ॐ उस्रावेतं धूर्षाहौ युज्येथामनश्रूऽअवीरहणौ ब्रह्मचौदनौ। स्वस्ति यजमानस्य गृहान् गच्छतम्।।1।।
कुंकुमं कान्तिदं दिव्यं कामिनीकामसंभवम्। कुंकुमेनार्चिते देवि प्रसीद परमेश्वरि।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
कुंकुमं (गुलालं) समर्पयामि।'

8.9/6-14 सिन्दूरम् -

'ॐ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतन्ति यह्वाः। घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः।1।
सिन्दूरमरुणाभासं जपाकुसुमसन्निभम्। अर्पितं ते मया भक्त्या प्रसीद परमेश्वरि।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, सिन्दूरं समर्पयामि।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

8.9/6-15 कज्जलम् -

'ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वारुणस्याग्नेः। आप्रा द्यावापृथिवीऽअन्तरिक्षꣳसूर्यऽआत्मा जगतस्तस्थुषश्च।1।।'

अथवा 'ॐ वृत्रस्यासि कनीनकश्चक्षुर्दाऽअसि चक्षुर्मे देहि।

चक्षुर्भ्याम् कज्जलं रम्यं सुभगे शान्तिकारकम्। कर्पूरज्योतिरुत्पन्नं गृहाण परमेश्वरि।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,

कज्जलं समर्पयामि।'

8.9/6-16 सुगन्धिद्रव्यं (इत्र) -

'ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्।।1।।

जननि चम्पकतैलमिदं पुरा मृगमदोऽयमयं पटवासकः। सुरभिगन्धमिदं च चतुस्समं सपदि सर्वमिदं परिगृह्यताम्।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः, सुगन्धिद्रव्यं समर्पयामि।'

8.10/1 पुष्पमालाम् -

'ॐ श्रीश्च ते लक्ष्मीश्च पात्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म इषाण सर्वलोकं म इषाण1

पद्मशंखजपुष्पादिक्षतपत्रैर्विचित्रताम्। पुष्पमालां प्रयच्छामि गृहाण त्वं परमेश्वरि।।1।।

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,

पुष्पमालां समर्पयामि।'

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

8.10/2 पुष्पाणि -

'ॐ मनसः काममाकूतिं वाचः सत्यमशीमहि। पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः।।1।।
ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत्किं बाहू किमूरू पादाऽउच्येते।।2।।
पुष्पैर्नानाविधैर्दिव्यैः कुमुदैरथ चम्पकैः। पूजां ते क्रियते देवि कुसुमैरनुगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
पुष्पाणि समर्पयामि।'

9.1 अथ दुर्गाया अंगानां पूजनम्

(मूर्ति के अंगों में अथवा यन्त्र में देवी के अंगों की कल्पना करके उनमें अंगपूजा करे।)

ॐ दुर्गायै नमः, पादौ पूजयामि।	ॐ महाकाल्यै नमः, गुल्फौ पूजयामि।	ॐ मंगलायै नमः, जानुद्वयं पूजयामि।
ॐ कात्यायन्यै नमः, ऊरुद्वयं पूजयामि।	ॐ भद्रकाल्यै नमः, कटिं पूजयामि।	ॐ कमलवासिन्यै नमः, नाभिं पूजयामि।
ॐ शिवायै नमः, उदरं पूजयामि।	ॐ क्षमायै नमः, हृदयं पूजयामि।	ॐ कौमार्यै नमः, स्तनौ पूजयामि।
ॐ उमायै नमः, हस्तौ पूजयामि।	ॐ महागौर्यै नमः, दक्षबाहुं पूजयामि।	ॐ वैष्णव्यै नमः, वामबाहुं पूजयामि।
ॐ रमायै नमः, स्कन्धौ पूजयामि।	ॐ स्कन्दमात्रे नमः, कण्ठं पूजयामि।	ॐ महिषासुरमर्दिन्यै नमः, नेत्रे पूजयामि।
ॐ सिंहवाहिन्यै नमः, मुखं पूजयामि।	ॐ माहेश्वर्यै नमः, शिरः पूजयामि।	ॐ कात्यायन्यै नमः, सर्वांगं पूजयामि।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

9.2 अथ आवरण पूजनम्

9. दाहिने हाथ में पुष्पाक्षत लेकर - '**संविन्मयेपरे देवि परामृतरुचिप्रिये। अनुज्ञां देहि मे मातः परिवारार्चनाय मे।।**' यन्त्र पर छोड़ें।

चित्र संख्या 5



यन्त्र मध्ये देवी स्थापनम्

बिन्दु के पूर्वादि चार दिशा में - '**ॐ गुरवे नमः, ॐ परमगुरवे नमः, ॐ परात्परगुरवे नमः, ॐ परमेष्ठि गुरवे नमः।**'

षडंगन्यास करे :- पहले अपने शरीर में - '**ॐ ऐं हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ क्लीं शिखायै वषट्,**

ॐ चामुण्डायै कवचाय हुम्, ॐ विच्चे नेत्रत्रयाय वौषट्, ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय फट्।

अब मूर्ति पर/यन्त्र में त्रिकोण के बाहर- '**ॐ ऐं हृदयाय नमः** - आग्नेये, **ॐ ह्रीं शिरसे नमः** - ईशान्ये,

ॐ क्लीं शिखायै नमः - नैर्ऋत्याम्, **ॐ चामुण्डायै कवचाय नमः** - वायव्याम्, **ॐ विच्चे नेत्रत्रयाय नमः** - पूर्वे,

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय नमः - सर्वदिक्षु।' (कुछ विद्वानों के मत में यह प्रथमावरण है)।

त्रिकोण में अपने सामने से शुरु कर प्रदक्षिणा के क्रम से पूजन करे, सर्वप्रथम यन्त्रस्थ त्रिकोण का ध्यान करें -

'रहस्यम्परमाश्चर्यं त्रिकोणानां च संशृणु। वामरेखा भवेद् ब्रह्मा विष्णुर्दक्षिणरेखिका।।
अधोरेखा भवेद् रुद्रो मात्रा साक्षात्सरस्वती। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि।।'

ॐ अं स्वरया सह विधात्रे नमः, ॐ इं श्रिया सह विष्णवे नमः, ॐ उं उमया सह शिवाय नमः।' त्रिकोण के दाहिने भाग में - **ॐ क्षुं/सिं सिंहाय नमः।** त्रिकोण के बाये भाग में - **'ॐ हुं/मं महिषाय नमः।** (कुछ विद्वानों के मत में यह द्वितीय आवरण है)।

9.2-1 अथ प्रथमावरणपूजा षट्कोणे - (**षट्कोण** में स्थित महालक्ष्मी के पृष्ठभाग से आरम्भ कर क्रमशः पूजन करे -)

चित्र संख्या 6



प्रथमावरणं

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ सरस्वतीब्रह्मभ्यां नमः, सरस्वतीब्रह्माणावावाहयामि स्थापयामि – 1 पश्चिमकोणे,

ॐ गौरीरुद्राभ्यां नमः, गौरीरुद्रावावाहयामि स्थापयामि – 2 नैर्ऋत्यकोणे,

ॐ लक्ष्मीहृषीकेशाभ्यां नमः, लक्ष्मीहृषीकेशावावाहयामि स्थापयामि – 3 वायुकोणे,

ॐ अष्टादशभुजायै नमः, अष्टादशभुजामावाहयामि स्थापयामि – 4 पूर्वकोणे,

ॐ दशाननायै नमः, दशाननामावाहयामि स्थापयामि – 5 अग्निकोणे,

ॐ अष्टभुजायै नमः, अष्टभुजामावाहयामि स्थापयामि – 6 ईशानकोणे।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं प्रथमावारणार्चनम्।।1।।

अनेन प्रथमावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीम्हासरस्वतीदेव्यः प्रीयन्ताम्।1

(कुछ विद्वानों के मत में यह आवरण नहीं है)।

9.2-2 अथ द्वितीयावरणपूजा – (पुनः <u>षट्कोण</u> में पूर्वादि क्रम से पूजन करे-)

चित्र संख्या 7



द्वितीयवरणं

ॐ नं नन्दजायै नमः, नन्दजामावाहयामि स्थापयामि - 1 पूर्वकोणे,

ॐ रं रक्तदन्तिकायै नमः, रक्तदन्तिकामावाहयामि स्थापयामि - 2 अग्निकोणे,

ॐ शां शाकम्भर्यै नमः, शाकम्भरीमावाहयामि स्थापयामि - 3 नैर्ऋत्यकोणे,

ॐ दुं दुर्गायै नमः, दुर्गामावाहयामि स्थापयामि - 4 पश्चिमकोणे,

ॐ भीं भीमायै नमः, भीमामावाहयामि स्थापयामि - 5 वायुकोणे,

ॐ भ्रां भ्रामर्यै नमः, भ्रामरीमावाहयामि स्थापयामि - 6 ईशानकोणे।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं द्वितीयावारणार्चनम्।।2।।

अनेन द्वितीयावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।2। (कुछ विद्वानों के मत में यह तीसरा आवरण है)।

9.2-3 अथ तृतीयावरण पूजा - (अब **षट्कोण** के बाहर क्रमशः आग्नेयादि चार कोणों में -)

चित्र संख्या 8



तृतीयवरणं

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized by Muthulakshmi Research Academy

ॐ जं जयायै नमः, जयामावाहयामि स्थापयामि – 1 आग्नेयकोणे,

ॐ विं विजयायै नमः, विजयामावाहयामि स्थापयामि – 2 नैर्ऋत्यकोणे,

ॐ जं जयन्त्यै नमः, जयन्तीमावाहयामि स्थापयामि – 3 वायुकोणे,

ॐ अं अपराजितायै नमः, अपराजितामावाहयामि स्थापयामि – 4 ईशानकोणे।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं तृतीयावारणार्चनम्।।3।।

अनेन तृतीयावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।3।

(कुछ विद्वानों के मत में यह आवरण नहीं है)।

9.2-4 अथ चतुर्थावरण पूजा – (<u>अष्टदलकमल</u> में पूर्वादि क्रम से –)



चित्र संख्या 9

चतुर्थावरणम्

ॐ ब्रां (आं) **ब्राह्म्यै नमः, ब्राह्मीमावाहयामि स्थापयामि** - 1 पूर्वकोणे,

ॐ मां (ईं) **माहेश्वर्यै नमः, माहेश्वरीमावाहयामि स्थापयामि** - 2 अग्निकोणे,

ॐ कौं (ऊं) **कौमार्यै नमः, कौमारीमावाहयामि स्थापयामि** - 3 दक्षिणकोणे,

ॐ वैं (ॠं) **वैष्णव्यै नमः, वैष्णवीमावाहयामि स्थापयामि** - 4 नैर्ऋत्यकोणे,

ॐ वां (ऌं) **वाराह्यै नमः, वाराहीमावाहयामि स्थापयामि** - 5 पश्चिमकोणे,

ॐ नां (ऐं) **नारसिंह्यै नमः, नारसिंहीमावाहयामि स्थापयामि** - 6 वायुकोणे,

ॐ ऐं (औं) **ऐन्द्र्यै नमः, ऐन्द्रीमावाहयामि स्थापयामि** - 7 उत्तरकोणे,

ॐ चां (अं) **चामुण्डायै नमः, चामुण्डामावाहयामि स्थापयामि** - 8 ईशानकोणे,

ॐ शिं (अः) **शिवदूत्यै नमः, शिवदूतीमावाहयामि स्थापयामि** - 9 मध्ये।

(अथवा - ॐ श्रीं लक्ष्म्यै नमः, लक्ष्मीमावाहयामि स्थापयामि - 9 मध्ये)

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं चतुर्थावारणार्चनम्।।4।।

अनेन चतुर्थावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।4।

(सभी विद्वानों के मत में यह चतुर्थ आवरण है)।

9.2-5 अथ पंचमावरण पूजा - (पुनः **अष्टदलकमल** में पूर्वादि क्रम से -)

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

चित्र संख्या 10



पंचमावरणम्

ॐ अं (अं) **असितांगभैरवाय नमः, असितांगभैरवमावाहयामि स्थापयामि** – 1 पूर्वकोणे,
ॐ रुं (इं) **रुरुभैरवाय नमः, रुरुभैरवमावाहयामि स्थापयामि** – 2 अग्निकोणे,
ॐ चं (उं) **चण्डभैरवाय नमः, चण्डभैरवमावाहयामि स्थापयामि** – 3 दक्षिणकोणे,
ॐ क्रों (ऋं) **क्रोधभैरवाय नमः, क्रोधभैरवमावाहयामि स्थापयामि** – 4 नैर्ऋत्यकोणे,
ॐ उं (लृं) **उन्मत्तभैरवाय नमः, उन्मत्तभैरवमावाहयामि स्थापयामि** – 5 पश्चिमकोणे,
ॐ कं (एं) **कपालभैरवाय नमः, कपालभैरवमावाहयामि स्थापयामि** – 6 वायुकोणे,
ॐ भीं (ओं) **भीषणभैरवाय नमः, भीषणभैरवमावाहयामि स्थापयामि** – 7 उत्तरकोणे,
ॐ सं (अं) **संहारभैरवाय नमः, संहारभैरवमावाहयामि स्थापयामि** – 8 ईशानकोणे।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं पंचमावारणार्चनम्।।5।।

अनेन पंचमावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।5।

(कुछ विद्वानों के मत में यह आवरण नहीं है)।

9.2-6 अथ षष्ठावरण पूजा - (<u>चतुर्विंशतिदल</u> कमल में पूर्वादि विपरीत क्रम यानि चित्र में दर्शाये क्रम से -)



चित्र संख्या 11

01 ॐ विं विष्णुमायायै नमः, विष्णुमायामावाहयामि स्थापयामि, **02 ॐ चें चेतनायै नमः, चेतनामावाहयामि स्थापयामि,**

03 ॐ बुं बुद्ध्यै नमः, बुद्धिमावाहयामि स्थापयामि, **04 ॐ निं निद्रायै नमः, निद्रामावाहयामि स्थापयामि,**

05 ॐ क्षुं क्षुधायै नमः, क्षुधामावाहयामि स्थापयामि, **06 ॐ छां छायायै नमः, छायामावाहयामि स्थापयामि,**

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

07 ॐ शं शक्त्यै नमः, शक्तिमावाहयामि स्थापयामि,
08 ॐ तृं तृष्णायै नमः, तृष्णामावाहयामि स्थापयामि,
09 ॐ क्षां क्षान्त्यै नमः, क्षान्तिमावाहयामि स्थापयामि,
10 ॐ जां जात्यै नमः, जातिमावाहयामि स्थापयामि,
11 ॐ लं लज्जायै नमः, लज्जामावाहयामि स्थापयामि,
12 ॐ शां शान्त्यै नमः, शान्तिमावाहयामि स्थापयामि,
13 ॐ श्रं श्रद्धायै नमः, श्रद्धमावाहयामि स्थापयामि,
14 ॐ कां कान्त्यै नमः, कान्तिमावाहयामि स्थापयामि,
15 ॐ लं लक्ष्म्यै नमः, लक्ष्मीमावाहयामि स्थापयामि,
16 ॐ धृं धृत्यै नमः, धृतिमावाहयामि स्थापयामि,
17 ॐ वृं वृत्त्यै नमः, वृत्तिमावाहयामि स्थापयामि,
18 ॐ स्मृं स्मृत्यै नमः, स्मृतिमावाहयामि स्थापयामि,
19 ॐ दं दयायै नमः, दयामावाहयामि स्थापयामि,
20 ॐ तुं तुष्ट्यै नमः, तृष्टिमावाहयामि स्थापयामि,
21 ॐ पुं पुष्ट्यै नमः, पृष्टिमावाहयामि स्थापयामि,
22 ॐ मां मात्रे नमः, मातरमावाहयामि स्थापयामि,
23 ॐ भ्रां भ्रान्त्यै नमः, भ्रान्तिमावाहयामि स्थापयामि,
24 ॐ चिं चित्त्यै नमः, चित्तिमावाहयामि स्थापयामि।

ॐ दयाब्धो त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं षष्ठाख्यावारणार्चनम्।।6।।

अनेन षष्ठावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।।6।।

कुछ विद्वानों के मत में यह पंचम आवरण है)।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digitized By Muthulakshmi Research Academy

9.2-7 अथ सप्तमावरण पूजा - (भूगृह/भूपुर के **प्रथम परिधि** में चित्र में दर्शाये क्रम से -)

चित्र संख्या 12



सप्तमावरणं

01 ॐ लं इन्द्राय नमः, इन्द्रमावाहयामि स्थापयामि, **02 ॐ रं अग्नये नमः, अग्निमावाहयामि स्थापयामि,**

03 ॐ मं यमाय नमः, यममावाहयामि स्थापयामि, **04 ॐ क्षां निर्ऋतये नमः, निर्ऋतिमावाहयामि स्थापयामि,**

05 ॐ वं वरुणाय नमः, वरुणमावाहयामि स्थापयामि, **06 ॐ यं वायवे नमः, वायुमावाहयामि स्थापयामि,**

07 ॐ सं सोमाय नमः, सोममावाहयामि स्थापयामि, **08 ॐ हं रुद्राय नमः, रुद्रमावाहयामि स्थापयामि,**

09 ॐ ब्रं (अं) **ब्रह्मणे नमः, ब्रह्माणमावाहयामि स्थापयामि,**

10 ॐ ह्रीं शेषाय (अनन्ताय) **नमः, शेषमा** (अनन्तमा) **वाहयामि स्थापयामि।**

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं सप्तमावारणार्चनम्।।7।।

अनेन सप्तमावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।7।

(सभी विद्वानों के मत में यह सप्तम आवरण है)।

9.2-8 अथ अष्टमावरण पूजा - (भूगृह/भूपुर के <u>द्वितीय परिधि</u> में चित्र में दर्शाये क्रम से -)

चित्र संख्या 13



अष्टमावरणं

01 ॐ वं वज्राय नमः , वज्रमावाहयामि स्थापयामि, **02 ॐ शं शक्त्यै नमः, शक्तिमावाहयामि स्थापयामि,**

03 ॐ दं दण्डाय नमः, दण्डमावाहयामि स्थापयामि, **04 ॐ खं खड्गाय नमः, खड्गमावाहयामि स्थापयामि,**

05 ॐ पां पाशाय नमः, पाशमावाहयामि स्थापयामि, **06 ॐ अं अंकुशाय नमः, अंकुशमावाहयामि स्थापयामि,**

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

07 ॐ गं गदायै नमः, गदामावाहयामि स्थापयामि, **08 ॐ त्रिं त्रिशूलाय नमः, त्रिशूलमावाहयामि स्थापयामि,**

09 ॐ पं पद्माय नमः, पद्ममावाहयामि स्थापयामि, **10 ॐ चं चक्राय नमः, चक्रमावाहयामि स्थापयामि।**

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यमष्टमावारणार्चनम्।।8।।

अनेन अष्टमावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।8।

देवी के अन्य अस्त्रों को भी इसी आवरण में स्थापित करें -

'ॐ अं अक्षमालायै नमः, अक्षमालामावाहयामि स्थापयामि 11।

ॐ सुं सुराभाजनाय नमः, सुराभाजनमावाहयामि स्थापयामि अथवा **ॐ कुं कुण्डिकायै नमः, कुण्डिकामावाहयामि स्थापयामि12।**

ॐ शं शंखाय नमः, शंखमावाहयामि स्थापयामि 13। **ॐ पं परशवे नमः, परशुमावाहयामि स्थापयामि 14।**

ॐ धं धनुषे नमः, धनुरावाहयामि स्थापयामि 15। **ॐ चर्माय नमः, चर्ममावाहयामि स्थापयामि 16।**

ॐ घं घण्टायै नमः घण्टामावाहयामि स्थापयामि 17। **ॐ सां सायकाय नमः, सायकमावाहयामि स्थापयामि 18।**

(सभी विद्वानों के मत में यह अष्टम आवरण है)। इन आयुधों का ध्यान कर इनकी मुद्राओं को भी दर्शायें।

9.2-9 अथ नवमावरण पूजा - (भूगृह/भूपुर की <u>तृतीय परिधि</u> में चित्र में दर्शाये क्रम से -)

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

चित्र संख्या 14



नवमावरणं

01 ॐ गं गणपतये नमः, गणपतिमावाहयामि स्थापयामि, 02 ॐ क्षें क्षेत्रपालाय नमः, क्षेत्रपालमावाहयामि स्थापयामि,
03 ॐ वं वटुकाय नमः, वटुकमावाहयामि स्थापयामि, 04 ॐ यों योगिन्यै नमः, योगिनीमावाहयामि स्थापयामि।
05 ॐ दुं दुर्गायै नमः, दुर्गामावाहयामि स्थापयामि - मध्ये। 06 ॐ विं विष्णवे नमः, विष्णुमावाहयामि स्थापयामि।
07 ॐ शिं शिवाय नमः, शिवमावाहयामि स्थापयामि। 08 ॐ सूं सूर्याय नमः, सूर्यमावाहयामि स्थापयामि।
09 ॐ गं गणेशाय नमः, गणेशमावाहयामि स्थापयामि - निर्ऋतौ।

ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्।।9।।
अनेन नवमावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।9।'

(कुछ विद्वानों के मत में यह षष्ठ आवरण है अत: उनके अनुसार नवम आवरण यह है –

ॐ वज्रहस्तायै गजारूढायै कादम्बरीदेव्यै नमः, कादम्बरीदेवीमावाहयामि स्थापपयामि 1। ॐ शक्तिहस्तायै अजवाहनायै उल्कादेव्यै महिषारूढायै करालीदेव्यै नमः, उल्कादेवीकरालीदेवीं चावाहयामि स्थापयामि 2। ॐ खड्गहस्तायै शववाहनायै रक्ताक्षीदेव्यै नमः, रक्ताक्षीदेवीमावाहयामि स्थापयामि 3। ॐ पाशहस्तायै मकरवाहनायै श्वेताक्षीदेव्यै नमः, श्वेताक्षीदेवीमावाहयामि स्थापयामि 4। ॐ अंकुशहस्तायै मृगवाहनायै हरिताक्षीदेव्यै नमः, हरिताक्षीदेवीमावाहयामि स्थापयामि 5। ॐ गदाहस्तायै सिंहारूढायै यक्षिणीदेव्यै नमः, यक्षिणीदेवीमावाहयामि स्थापयामि 6। ॐ शूलहस्तायै वृषभवाहनायै कालीदेव्यै नमः, कालीदेवीमावाहयामि स्थापयामि 7। ॐ पद्महस्तायै हंसवाहनायै सुरज्येष्ठादेव्यै नमः, सुरज्येष्ठादेवीमावाहयामि स्थापयामि 8। ॐ चक्रहस्तायै सर्पवाहनायै सर्पराज्ञीदेव्यै नमः, सर्पराज्ञीदेवीमावाहयामि स्थापयामि 9। ॐ दयाब्धे त्राहि संसारसर्पान्मां शरणागतम्। भक्त्या समर्पये तुभ्यं नवमावारणार्चनम्।।9।। अनेन नवमावरणार्चनेन ॐ भूर्भुवःस्वः त्रिगुणात्मिकाया भगवत्यः महाकालीमहालक्ष्मीमहासरस्वतीदेव्यः प्रीयन्ताम्।।9।।')

'**ॐ यन्त्रस्थावाहित आवरणदेवताभ्यो नमः**' इस मन्त्र से पंचोपचार पूजन करे। तत्पश्चात् देवी को यन्त्र के मध्य में स्थित त्रिकोण में स्थापित कर उसके दाहिने भाग में – '**ॐ कालाय नमः, ॐ रुद्राय नमः**' और देवी के बाये भाग में – '**ॐ मृत्यवे नमः, ॐ विनायकाय नमः**' मन्त्रों से आवाहनादि पूर्वक पुष्पार्चन करें। इसके बाद देवी की सहस्रनामावली से कुंकुम अथवा पुष्प अथवा कामना के अनुसार विहित द्रव्य से अर्चना करें (चतुर्थ्यन्त नामावली केलिये इसी ग्रन्थ के पृष्ठ संख्या 318 देखें)।

CC-0. Swami Satyam Sahajananda Giri, Rishikesh. Digitized by Muthulakshmi Research Academy

9.3 अथ नवदुर्गापूजनम्

1. ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणी। पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते।।1।।
   ॐ भूर्भुवःस्वः शैलपुत्र्यै नमः, शैलपुत्रीमावाहयामि स्थापयामि।
2. ॐ त्रिपुरां त्रिगुणाधारां ज्ञानमार्गस्वरूपिणीम्। त्रैलोक्यवन्दितां देवीं त्रिमूर्तिं पूजयाम्यहम्।।2।।
   ॐ भूर्भुवःस्वः ब्रह्मचारिण्यै नमः, ब्रह्मचारिणीमावाहयामि स्थापयामि।
3. ॐ कालिकां तु कलातीतां कल्याणहृदयां शिवाम्। कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम्।।3।।
   ॐ भूर्भुवःस्वः चन्द्रघण्टायै नमः चन्द्रघण्टामावाहयामि स्थापयामि।
4. ॐ अणिमादिगुणोपेतां मकाराकारचक्षुषाम्। अनन्तशक्तिसंपन्नां कामाक्षीं पूजयाम्यहम्।।4।।
   ॐ भूर्भुवःस्वः कूष्माण्डायै नमः, कूष्माण्डामावाहयामि स्थापयामि।
5. ॐ चण्डवीरां चण्डमायां चण्डमुण्डप्रभंजिनीम्। अनन्तगुणसंपन्नां चण्डिकां पूजयाम्यहम्।।5।।
   ॐ भूर्भुवःस्वः स्कन्दमात्रे नमः, स्कन्दमातरमावाहयामि स्थापयामि।
6. ॐ सुखानन्दकरीं शान्तां सर्वदेवैर्नमस्कृताम्। सर्वभूतात्मिकां देवीं शाम्भवीं पूजयाम्यहम्।।6।।
   ॐ भूर्भुवःस्वः कात्यायन्यै नमः, कात्यायनीमावाहयामि स्थापयामि।
7. ॐ चण्डवीरां चण्डमायां रक्तबीजप्रभंजिनीम्। समस्तलोकजननीं गायत्रीं पूजयाम्यहम्।।7।।
   ॐ भूर्भुवःस्वः कालरात्र्यै नमः, कालरात्रीमावाहयामि स्थापयामि।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

8. ॐ सुन्दरीं स्वर्णवर्णांगीं सुखसौभाग्यदायिनीम्। कल्याणकारिणीं देवीं सुभद्रां पूजयाम्यहम्।।8।।

ॐ भूर्भुवःस्वः महागौर्यै नमः, महागौरीमावाहयामि स्थापयामि।

9. ॐ दुर्गमे दुस्तरे कार्ये सर्वकष्टविनाशिनीम्। सर्वकामप्रदां देवीं सिद्धिदां पूजयाम्यहम्।।9।।

ॐ भूर्भुवःस्वः सिद्धिदात्र्यै नमः, सिद्धिदात्रीमावाहयामि स्थापयामि।

अथ नवदुर्गा ध्यानम् –

'ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः।1।

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।

दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता।।1।।

प्रधानसाधारविकल्पसत्तास्वभावभावाद् भुवनत्रयस्य।

सा विद्यया व्यक्तमपीह माया ज्योतिः परा पातु जगन्ति नित्यम्।।2।।'

ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै भगवत्यै महाकालीमहालक्ष्मीमहासरस्वतीरूपायै जगदम्बायै नवदुर्गादेव्यै नमः, ध्यानं समर्पयामि।'

10 धूपादि अवशिष्ट उपचाराः

8.11 धूपम् –

'ॐ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। सूक्तम्पंचदशर्चं ञ्च श्रीकामः सततं जपेत्।।1।।

CC-0. Shri Satyam Sadhana Kutir, Rishikesh. Digtized by Muthulakshmi Research Academy

ॐ धूरसि धूर्व धूर्वन्तं धूर्व तं योऽअस्मान्धूर्वति तं धूर्व यं वयं धूर्वामः।
देवानामसि वह्नितमꣳसस्नितमं पप्रितमं जुष्टतमं देवहूतमम्।।1।।
दशांगगुग्गुलं धूपं चन्दनागरुसंयुतम्। समर्पितं मया भक्त्या महादेवि प्रगृह्यताम्।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
धूपमाघ्रापयामि समर्पयामि।'

8.12 दीपम् - (घण्टी बजाते हुये)

'ॐ आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे। नि च देवीं मातरं श्रियं वासय मे कुले।।1।।
ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।।2।।
घृतवर्तिसामयुक्तं महातेजो महोज्ज्वलम्। दीपं दास्यामि देवेशि सुप्रीता भव सर्वदा।।1।।
ॐ भूर्भुवःस्वः त्रिगुणात्मिकायै महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै जगदम्बायै दुर्गादेव्यै नमः,
दीपं दर्शयामि समर्पयामि।'

8.13/1 नैवेद्यम् - (घण्टी बजाते हुये)

'ॐ आर्द्रां पुष्करिणीं पुष्टिं पिंगलां पद्ममालिनीम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह।।1।।
ॐ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ2ऽअकल्पयन्।।2।।
